४५०३

२२६८

अथलघुसंग्रहः प्रारभ्यते

श्री ग्र्र ह्रः ते

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

२२६८

रु.सं. श्रीगणेशायनमः॥ भवानींगणनाथंचनत्वाब्रह्मादिदेवताः॥ बालानांचसुबोधायकुर्वेऽहंलघुसंग्रहम्॥१॥ अथैनक्षत्रना
१ मानि॥१॥ अश्विनी।भरणी।कृत्तिका।रोहिणी।मृगशिरा।आर्द्रा।पुनर्वसू।पुष्य।श्लेषा।मघा।पूर्वा।उत्तरा।हस्त।चित्रा।स्वाती।वि
शाखा।अनुराधा।ज्येष्ठा।मूल।पूर्वाषाढा।उत्तराषाढा।अभिजित।श्रवण।धनिष्ठा।शतभिषा।पूर्वाभाद्रपदा।उत्तराभाद्रपदा।रे
वती॥ इतिनक्षत्रनामानि॥ चुचेचोला अश्विनी।लिलुलेलो भरणी।अइउए कृत्तिका।ओवाविवू रोहिणी।वेवोकाकी मृगशि
रा।कुघङछ आर्द्रा।केकोहाहि पुनर्वसु।हुहेहोडा पुष्य।डिडुडेडो श्लेषा।ममिमुमे मघा।मोटाटिटु पूर्वाफाल्गुनी।टेटोपपि उ
त्तराफाल्गुनी।पुषणठ हस्त।पेपोररि चित्रा।रुरेरोता स्वाती।तितुतेतो विशाखा।ननिनुने अनुराधा।नोयायियु ज्येष्ठा।ये
योभभि मूल।भूधाफाढा पूर्वाषाढ।भेभोजजि उत्तराषाढा।जुजेजोखा अभिजित्।खिखुखेखो श्रवण।गगिगुगे धनिष्ठा।गोसासि
शुषातभिषा।शेशोदादि पूर्वाभाद्रपद।दुथझञ उत्तराभाद्रपद।देदोचचि रेवती॥ ❀ ॥ अश्विनीभरणीकृत्तिकाः पादमेकं
मेषः॥१॥ कृत्तिकापादत्रयंरोहिणीमृगशिरार्द्धं वृषः॥२॥ मृगशिरार्द्धंआर्द्रापुनर्वसुपादत्रयंमिथुन॥३॥ पुनर्वसुपादमे
कंपुष्याश्लेषान्तंकर्कः॥४॥ मघाचपूर्वाफाल्गुनी उत्तराः पादमेकंसिंहः॥५॥ उत्तरापादत्रयंहस्तचित्रार्द्धंकन्या॥६॥ चित्रार्द्धं
स्वातीविशाखापादत्रयंतुला॥७॥ विशाखापादमेकंअनुराधाज्येष्ठान्तंवृश्चिकः॥८॥ मूलंचपूर्वाषाढउत्तराषाढपादं
धनुः॥९॥ उत्तराषाढपादत्रयंश्रवणधनिष्ठार्द्धंमकरः॥१०॥ धनिष्ठार्द्धंशतभिषापूर्वाभाद्रपादत्रयंकुंभः॥११॥ पू
CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri
र्वाभाद्रपादमेकंउत्तराभाद्रपदरेवत्यंतेचमीनः॥१२॥ इतिहोडाचक्रम्॥ अथयोगनामानि॥ विष्कंभ।प्रीति।आयुष्मान।

नमी

ग्य। शोभन। अतिगंड। सुकर्मा। धृति। शूल। गण्ड। वृद्धि। ध्रुव। व्याघात। हर्षण। वज्र। सिद्धि। व्यतिपात। वरियान्। परिघ। सुध

वा। सिद्धि। साध्य। शुभ। शुक्ल। ब्रह्मा। ऐन्द्र। वैधृतिः॥ इति योगनामानि॥ द्वितीया धनमीनेषु चतुर्थी वृषकुम्भयोः। मेषकर्कटयोः विष्टेः

षष्ठी कन्यामिथुनचाष्टमी॥१॥ दशमी वृश्चिके सिंहे द्वादशी मकरे तुले। एतास्तु तिथयो दग्धाः शुभे कर्म्मणि वर्जिताः॥२॥ नन्दा भद्रा

न्दा भद्रा जया रिक्ताः पूर्णाश्च तिथयः क्रमात्॥ वारत्रयं समावर्त्य तिथयः प्रतिपन्मुखाः॥३॥ नन्दा शुक्रे सिते भद्रा सोमे चैव

जया तथा॥ गुरौ रिक्ता शनौ पूर्णा कालयोगाः प्रकीर्तिताः॥४॥ द्वादशी रविणा युक्ता सोमे चैकादशी तथा॥ दशमी भौमवारेण

नवमी बुधसंयुता॥५॥ अष्टमी गुरुणा योगे सप्तमी भृगुसंयुता॥ षष्ठी शनैश्चरे वापि योगाश्चैते च निन्दिताः॥६॥ श्रीपतिः॥

त्यज रविमनुराधा वैश्वदेवं च सोमे शतभिषमपि भौमे चन्द्रपुत्रे श्विनी च॥७॥ शशिधरमपि जीवे सार्प्यदेवं च शुक्रे रविसु

तमपि हस्ते मृत्युयोगा भवंति॥८॥ मघार्कवारे शशिनि द्विदैवं आर्द्रा कुजे सौम्यसुते च मूलं। गुरौ धनिष्ठा भृगु रोहिणी च रवि

नौ च हस्तो यमघंटयोगः॥९॥ वर्जयेत्सर्वकार्येषु हस्तार्के पंचमी तिथौ॥ भौमाश्विनी च सप्तम्यां षष्ठ्यां चन्द्रेन्दवं तथा॥१०॥

बुधानुराधामष्टम्यां दशम्यां भृगुरेवतीम्॥ नवम्यां गुरुपुष्यं चैकादश्यां शनिरोहिणीं॥११॥ गृहप्रवेशे यात्रायां विवाहे च यथा

क्रमम्॥ भौमेश्विनीं शनौ ब्राह्म्यं गुरौ पुष्यं विवर्जयेत्॥१२॥ कुयोगास्तिथिवारोत्थास्तिथिभोत्था भवारजाः॥ हूणवङ्गखशेष्वेव

र्ज्यास्त्वितरे तत्र जास्तथा॥१३॥ मृत्युः क्रकचदग्धादीन्निन्द्यो शस्ते शुभान् जगुः॥ केचिद्यामोत्तरं चान्ये यात्रायामेव निन्दिताः॥१४॥ ग्र

न्यान्तरे॥ वैधृतिं च व्यतीपातं परिघार्द्धं तथैव च॥ [illegible] वर्ज्याः सकलकर्मसु॥१५॥ विष्कंभे घटिकास्तिस्रः प्र

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ल॰सं॰ लेपंचप्रकीर्तिताः॥ वर्ज्जेचनवनाड्यश्चषट्चंगंडान्तिगण्डयोः॥१६॥ अथार्द्धयामः॥ रवौवर्ज्यंचतुर्थंचसोमेसप्तद्वयंत
२ ॥कुजेषष्ठद्वयंचैवबुधेपंचतृतीयकम्॥१७॥ गुरौसप्ताष्टकंचैवशुक्रेवेदतृतीयकम्॥ शनावाद्यन्तषष्ठंचवारवेलाति
न्दिताः॥१८॥ इत्यर्द्धयामः॥ वारादितोगतघटीद्विघ्नापंचहृताप्तकम्॥ लब्धसैकंदिनाधीशात्क्रशुक्रस्तचन्द्रमाः॥१९
रिजीवकुजाश्चैवकालहोराधिपाःस्मृताः॥ कालहोरासुतत्कार्य्यंयस्मात्कंचासरेस्वके॥२०॥ वर्षान्तेवर्जयेत्पक्षंमासान्तेच
नत्रयम्॥ घटिकाद्वयमब्दान्तेग्रहणाद्दिनसप्तकम्॥२१॥ विपाशैरावतीतीरेशतद्र्वाश्चत्रिपुष्करे॥ वर्ज्जयेत्सर्वकार्येषुहो
काप्राग्दिनाष्टकम्॥२२॥ अथगण्डान्तः॥ तत्रवसिष्ठः॥ अश्विनीमघमूलादौगुर्व्वोगण्डद्वयंतथा॥ रेवतीसर्पशक्रान्तेगंडो
ण्डद्वयंमतः॥२३॥ ग्रन्थान्तरे। अश्विनीमघमूलादौत्रि ३ वेद४ नव९ नाडिकाः। रेवतीसर्पशक्रान्तेमास१२ रुद्र११ रस६
स्तथा२४ मूलादौवेदघटिकासुजायतेयदिमानवः समाष्टकंपितातस्यमुखंनैवविलोकयेत्॥२५॥ सर्वेषांगण्डजातानांपरि
त्यागोविधीयते॥ तातेनादर्शनंकार्य्यंयावत्षण्मासिकोभवेत्॥ अथवाविधानतःशांतिःकर्त्तव्याशुभमिच्छता॥ विवाहादि
शुभेनेष्टायात्रायांविघ्नकारकः॥२७॥ अथशांतिविधिःसंक्षेपः। शतौषधीमूलमृद्स्सुरत्नैस्सद्वीजगर्भैःकलशैःसमन्त्रैः।कु
र्याज्जनित्रपितृबालकानांस्नानंशुभार्थीसहहोमदानैः॥२८॥ शतौषधीमूलचूर्णअलाभेसर्वौषधीमूलंतदलाभेतुल
ग्राह्यम्॥ मुरामांशीवचाकुष्टंसैलेयरजनीद्वयम्॥ शुंठीचंपकमुस्ताचसर्वौषधिगणःस्मृतः॥२९॥ सप्तमृत्तिकाराजस्थ
यस्थानात्चतुष्पथात्वल्मीकस्थानात्नदीसंगमात्गोशालात्राजद्वारात्॥३०॥ अपरमन्यत्रतःअवगम्यशान्ति

T CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

धेयम्। ग्रन्थविस्तरभयान्नलिखितम्। यतो वासनाग्रन्थविस्तारो दुस्तरः॥ अथ विष्टिः॥ कृष्णे तृतीया दशमी च रात्रौ सप्तमी
भूतदिवा च भद्रा। एकादशी नक्तमतश्चतुर्थी शुक्लाष्टमी पूर्णदिवा च भद्रा॥ ३१॥ अथ भद्रामुखम्॥ दशम्यामष्टम्यां वसुघ
टिकाभ्यः पंचकमथो हरिद्युः सप्तम्यां तिथिमितनाड्यूर्ध्वं शरमितम्। ततो याराकायां त्रियमघटिकाभ्यः शरमितं मुखं विष्टेः
प्रोक्तं शिवतिथिचतुर्थ्यादौ न शुभदं॥ ३२॥ अथ भद्रापुच्छम्। भेष्वर्कैनखनाड्यूर्ध्वं भद्रापुच्छं घटित्रयम्॥ क्रमेणैव सिते
पक्षे उत्क्रमेण सितेतरे॥ ३३॥ अथ भद्रावासः॥ कुंभमीनालिसिंहेऽब्जे विष्टेर्वासो महीतले॥ मेषादित्रितयं कर्कैः स्वर्गलोके मही
यते॥ ३४॥ कन्यातुलामृगे चापेषु पाताले यत्र तत्फलम्॥ इति संक्षेपतस्त्याज्यप्रकरणम्॥ अथ कश्चित्शुभयोग उच्यते। त
त्र रामः। सूर्येऽर्कमूलोत्तरपुष्यदास्रं चंद्रे श्रुतिब्राह्म्यशशीज्यमैत्रं। भौमेऽश्विहिर्बुध्न्यकृशानुसार्पं ज्ञे ब्राह्म्यमैत्रार्ककृशानु
चांद्रम्॥ ३५॥ जीवेंत्यमैत्राश्विदितीज्यधिष्ण्यं शुक्रेंत्यमैत्राश्विदितिश्रवो भम्। शनौ श्रुतिब्राह्म्यसमीरभानि सर्वार्थसिद्ध्यै कथिता
नि पूर्वैः॥ ३६॥ सूर्यभाद्वेद ४ गो ९ तर्क ६ दिग् १० विश्व १३ नख २० संमिते। चन्द्रर्क्षैरवियोगाः स्युर्दोषसंघविनाशकाः॥ ३७॥ श्री
पतिः। नन्दा शुक्रे सोमपुत्रे च भद्रा रिक्ता मन्दे लोहितांगे जया च॥ वाचां पत्यौ या च पूर्णाभिधाना सर्वारंभेष्वेव सिद्धा तिथिः स्यात
॥ ३८॥ रामः। अयोगे सुयोगोऽपि चेत्स्यात्तदानीमयोगं निहत्यैष सिद्धिं तनोति। परे लग्नशुद्ध्या कुयोगादिनाशं दिनार्द्धोत्तरं
विष्टिपूर्वं च शस्तम्॥ ३९॥ विष्टिरंगारकं चैव व्यतीपातं स वैधृतिं। प्रत्यरिर्जन्मनक्षत्रं मध्यान्हात्परतः शुभम्॥ ४०॥ इति शु
भयोगः॥ अथ संक्रांतिगोचरप्रकरणम्। पूर्वतोऽपि परतोऽपि संक्रमात्पुण्यकालघटिका च षोडश॥ अर्द्धरात्रिसमयादनंत

T

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ल॰ सं॰
३

कृष्णा॰	३	७	१०	१४	४	११	८	१५	
एतत् घटि ऊर्द्धमेतत्	२३	१५	८	१	१	१५	८	२२	एतदूर्ध्वम्
तद्घटिमितं भद्रासुखम्	५	५	५	५	५	५	५	५	एतत् घटि
एतत् घटि ऊर्द्धम॰ए	२०	१२	५	२७	२७	५	१२	२०	परिमितं भ
तत् मितं भद्रापुच्छम॰	३	३	३	३	३	३	३	३	द्रापुच्छम:

रं संक्रमं परदिने हि पुण्यदम्॥ ४१॥ कार्मुकं च परित्यज्य म
करे याति दिवाकरः॥ प्रदोषे चार्द्धरात्रे वा तदा पुण्यं परेऽह
नि॥ ४२॥ यद्यर्द्धरात्रिरेवं स्यात्तं पूर्णो संक्रमो रवेः॥ तदा
दिनद्वयं पुण्यं स्नानदानादिकर्मसु॥ ४३॥ रवैः॥ इंद्१क१त
र्कौ६ अष्टाष्टौ ८८ नाड्यो का९ख नृपाः १६० क्रमात्। वर्ज्या
संक्रमणेऽर्कादेः प्रायोऽर्कस्याति निन्दिताः॥ ४४॥ संक्रांतध
रनस्न्नाद्गुणयेच्चन्नि षट् ६ त्रि ३ षट् ६॥ पंथा भोगोव्यथा वस्त्रं
हानिश्च विपुलं धनम्॥ ४५॥ अथ द्वितीयः॥ यस्मिन्भाति च
न्द्रः करकलिततिथौ दृश्यमानः प्रदोषे देयं तन्मध्यशृंगे फलमिह कथितं जन्मन सन्नयोगात्॥ त्रासं वित्तस्य लाभं भयम
पि कथितं भूपसन्मानता च स्थानत्यागं च लाभं भगणि गणक संज्ञां वदिन्दोर्द्वितीया॥ ४६॥ अथ ग्रहाणां गोचरफलम्॥ त
ञ्श्रीपतिः॥ सर्वे लाभ ११ गृहस्थितास्त्रि ३ ख १० रिपुष्वर्कः कुजार्कित्रि ३ षट् ६ प्राप्तोऽन्त्या ३ द्य १ ख १० मन्मथा ७ रिपु ६ शशि
ख १० स्ता ७ रि ६ वर्ज्जे भृगुः॥ धी ५ धर्म्मा ९ स्त ७ धनेषु २ वाक्पतिररिः ६ ख २ स्रा ८ म्बु ४ ख १० स्थो बुधः श्रेष्ठो जन्मग्रहादिगो रामः
चरविधौ विद्धो न चेत्स्यात् ग्रहैः॥ ४७॥ धेनुः शंखोऽरुणरुचिवृषो कांचनं पीतवस्त्रं श्वेतस्त्रश्वः सुरभिरसिता कृष्णलोहं ३

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मह्याज्ञः।सूर्यादीनांमुनिभिरुदितादक्षिणास्तुग्रहाणाम्स्नानैर्दानैर्हवनबलिभिस्तेत्रतुष्यंतिखेटाः॥४८॥अपरंग्रहंव
र्णापेक्षयादानंदेयं॥सूर्यभौमप्रीतयेआरक्तवस्तूनिदेयानि।बुधगुरुप्रीतयेपीतवस्त्रंदेयं।चन्द्रशुक्र प्रीतयेश्वेतव
स्तूनिदेयानि।शनिराहुकेतुप्रीतयेकृष्णवस्तूनिदेयानि॥अथस्नानविधिः॥लाजाकुष्ठबलाप्रियंगुकघनासिद्धार्थैःनिशादा
रुभिः।पुंस्त्वालोध्रयुतैर्जलैर्निगदितंस्नानंग्रहोत्थाघहृत्॥४९॥अथताराबलम्॥जन्मभाद्गणयेद्दाहोदिनधिष्ण्यावधिक्र
मात्॥नवभिस्तुहरेद्भागंशेषंताराप्रकीर्तिताः॥जन्मसंपद्विपत्क्षेमप्रत्यरिःसाधकोवधः।मैत्रंवाचातिमैत्रंचतारानामसदृक्
फलम्॥५०॥कृष्णेबलवतीताराशुक्लेचन्द्रस्तुवीर्यवान्॥सर्वेषुशुभकार्येषुयात्रादौचिन्तयेत्सुधीः॥५१॥इतिताराबल
म्॥अथपातदोषः॥सूर्यभुक्ताच्चनक्षत्रादेषुपातोविधीयते।आश्लेषाच९मघा१०चित्रा१४सानुराधा१७तथैवच॥५२
॥श्रवणरेवतीचैवगणयेद्रविभादितः॥पातसंज्ञेचनक्षत्रेविवाहादिशुभंत्यजेत्॥५३॥अथमुहूर्ताः॥तत्रश्रीपतिः।रौ
द्राहिमित्रपितरोवसुवारिविश्वेवेधाविधिःशतमखःपुरुहूतवह्निः।नक्तंचराश्चवरुणार्यमयोनयश्चप्रोक्तादिनेदशच
पंचतथामुहूर्ताः॥५४॥निशामुहूर्तागिरिशाजपादाहिर्बुध्न्यपूषाश्वियमाग्नयश्च॥विधातृचंद्रादितिजीवविष्णुतिग्मद्यु
तित्वाष्ट्रसमीरणाश्च॥५५॥अर्यम्णार्केतुहिनकिरणेराक्षसब्राह्मसंज्ञौपित्राग्नेयौक्षितिसुततदिनेचंद्रपुत्रेऽभिजिच्च॥पित्र्यब्रा
ह्मौभृगुसुततदिनेसार्परक्षश्चजीवेभौजंगेशौसवितृतनयेवर्जनीयौमुहूर्तौ॥५६॥अभिजिन्मुहूर्तेदक्षिणदिग्गमनंवर्ज्य
म्॥मुहूर्तेसर्वस्मिन्दिक्शूलादिविचिन्त्यम्॥५७॥मन्देन्दुनात्मजेसूर्येगुरुवारंचदक्षिणे॥पश्चिमेभृगुभानुभ्यामुत्तरेबुधभौ

T CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ल· सं· मयोः १८ आग्नेय्यां सोमगुरौ नैर्ऋत्यां रविभार्गवौ॥ वायव्यां मंगलं चैव ऐशान्यां बुधमंदयोः॥ ५८॥ इ० का० पी० इतिसंक्रांति
४ गोचरतारावलोपग्रहमुहूर्तप्रकरणम्। अथ नक्षत्रदेवताः॥ अश्वो १ यमो २ नलो ३ ब्रह्म ४ चन्द्रो ५ रुद्रो ६ दिति ७ र्गुरुः ८
सर्प्पः ९ पिता १० भगश्चैव ११ अर्य्यमा च १२ दिवाकरः १३ त्वष्टा १४ वायुः १५ कृशान्विंद्रो १६ मित्रश्चैव १७ पुरन्दरः १८ नि
र्ऋतिः १९ सलिलश्चैव २० विश्वेदेवो २१ जनार्दनः २२ वसवो २३ वारुणश्चैव २४ तथैवस्यादजैकपाद् २५ अहिर्बुध्न्यः २६
तथा पूषा २७ क्रमान्नक्षत्रदेवताः॥ ५९॥ अथ कृष्यारम्भः। रैनक्षत्रचिन्तामणौ। रेवत्यश्विकरत्रयेमृगमघामूलानुराधोत्तरा
ज्येष्ठादासवरोहिणीषु हरिभे पुष्ये विशाखासु च॥ आदित्ये शततमे च सौम्यदिवसे ह्यङ्के वृषे वृश्चिके बीजानां वपनं हलप्रवह
णं छेदादिकं शोभनम्॥ ६१॥ दशम्येकादशी चैव तृतीया च त्रयोदशी॥ सप्तमी पंचमी चैव प्रतिपच्च सुखावहाः॥ ६२॥ रिक्ताष्ट
मी विष्टिषु नष्टचन्द्रे क्षीणेन्दुसूर्यार्कजभौमवस्रे॥ निरंशके वा निशि संध्ययोर्वा कृता कृषिः पूर्वधनानि हन्ति॥ ६३॥ भाद्रत्रये
शिरः प्राच्यां याम्यां मार्गत्रये शिरः। फाल्गुनत्रितये पश्चाच्छिरो ज्येष्ठत्रयोत्तरे॥ ६४॥ ऊर्द्धभागत्रयं त्यक्त्वा अधोभागद्वयं तथा
॥ मध्ये नाभिं विजानीयादिति प्राह पराशरः॥ ६५॥ यत्र नाभिस्तत्र हलबीजोप्तिः कर्त्तव्या॥ रामरामाग्नि पंचाग्नि पंचाब्धि च शु
भाशुभम्। अर्कोभिजिच्च नक्षत्राल्लांगलं चक्रमीरितम्॥ ६६॥ इति हलचक्रम्॥ अथ बीजोप्तिः॥ राहुभादष्टकं यावत् द्वादशं
षोडशं तथा॥ विंशन्मिते तथा चान्ते वेदसंख्यास्तु जेद्बुधः॥ ६७॥ इति बीजोप्तिचक्रम्॥ सोमसौम्यगुरुशुक्रवासराः सर्वक राम·
र्मसु भवंति सिद्धिदाः॥ भानुभौमशनिवासरेषु च प्रोक्तमेव खलु कर्म सिद्ध्यति॥ ६८॥ अथ वस्त्रपरिधानं नवान्नं च०॥ रेवत्यां ४

T CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

एतेष्वेव नवान्नमत्र च समगो
करं पंचकाश्विवसुभे वस्त्रांबुधादित्र येपुंसां पुष्यपुनर्वसूत्तरयुतारोहिण्यपि श्रेयसी॥ ६९॥ हस्ताश्विपुष्यमृगवासवरोहिणीषु चि
त्रोत्तरा निर्ऋतिमित्रविशाखभेषु॥ पूर्वास्फ पादपविधिः शुभदो नराणां वारेषु चन्द्रबुधभार्गववाक्पतीनाम्॥ ७०॥ हस्तांगे
विष्णौ भं शस्यते चन्द्रार्कौ वपि मीनगौ युवतिभिः सार्द्धं तथा मन्मथः॥ अथ नर्पदर्शनं॥ चित्रोत्तरा वे
स्थिरे लग्ने चापि शुभैः केन्द्रत्रिकोणगैः। पापैस्त्रिषट्दशायस्थैः छत्रायारोपणं हितम्॥ ७१॥ अथ मत्यारम्भः
ष्णावधात्र पूषा पुष्याश्रविष्ठाश्विमृगानुराधा। शुभाश्च तारा तिथिवारयोगा महीपतीनामिलने प्रदिष्टाः॥ ७२॥ अथ पशूनां क्रयविक्रयः॥ वातहू
॥ मघावरुणपूर्वास्फमूलार्द्रा भरणीषु च। पौरहूते च सार्पे च समयारम्भः शुभावहः॥ ७३॥ क्रयर्से
येचादितिभहूये च वसुहूये पौष्णयुगे च सौम्ये॥ शाक्रे च मूले पितृभे शुभे ऽन्हि कुर्यात् पशूनां क्रयणं गमं च॥ ७४॥ अथ विपणिः॥ कुंभराशिमपहाय स
विक्रयो नेष्टो विक्रयर्से क्रयोपि न॥ पौष्णाम्बुवाश्विनी वातश्रवश्चित्राक्रये शुभाः॥ ७५॥ अथ गजाश्वदोलादि
धुषु द्रव्य २ कर्म १० भव ११ मूर्ति १ वर्तिषु। व्यये १२ षु शुभ मदापि षूद्रमे भार्गवे विपणिरिंदुसंयुते॥ ७६॥ अथ गजाश्वदोलादि
कर्माणि। तत्र यशोधरः॥ हस्तत्रये देवारिपुत्रये च पूषाश्विजीवादितिचन्द्रभेषु। ज्ञशुक्रचंद्रार्कबृहस्पतीनां दोले भवाजी
न्द्रविधिः प्रशस्तः॥ ७६॥ रिक्तावर्जिततिथिषु॥ अथ शस्त्रधारणम्॥ दैवज्ञचिंतामणौ। दास्रस्वातिचतुष्टये दितियुगे वि
त्रोत्तरा पूषभे रोहिण्यां गुरुभार्गवार्कदिवसे योगे तिथौ शोभने। लग्ने गोघटसिंहरंध्रभवने शुद्धे विधौ शोभने सन्नाहादि सम
स्तशस्त्रनिचयाः राज्ञा हिता धारिताः॥ ७७॥ अथ वापीकूपतडागादिखननम्॥ तत्रा रामः॥ मित्रार्कध्रुववासवाम्बुपमघातोया

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ल॰ सं॰ पुष्येन्दुभिः पापैर्हीनबलैस्तनौ सुरगुरौ गेवा भृगौ खे विधौ॥ आप्ये सर्वजलाशयस्य खननं ब्राह्मे मघे सेन्दुभैः सैर्न्यं हि ध्रुवे
५ शुभैस्तनुगृहे ज्ञे वा जीवे नराशौ शुभम्॥७८॥ ग्रन्थांतरे॰ मघोत्तनात् पंच नगांक सूर्य्यैर्नवेन्दुषड्विंशसितेषु भेषु। शतेमहीनेच वर्गौं
हं विधेयम् तडागवापीखननं न शस्तम्॥७९॥ अथ सेवाकर्म ग्रंथांतरे। रोहिण्युत्तरपौष्णेषु वसुवारुणयोरपि। सेवयेत्स्वामिनं
मत्स्यशुभवारोदये तिथौ॥८०॥ स्ववर्गं द्विगुणं कृत्वा परवर्गेण योजयेत्॥ वसुभिश्च हरेद्भागं योऽधिकः स ऋणी भवेत्। ८१॥
अ८ क५ च६ ट४ त७ प१ य३ श२ वर्गाः खगेशमार्जारसिंहश्वानकानां। सर्पाखुमृगावीनां निजपंचमवैरिणामष्टौ॥८२॥ अ
थ नौकाघटनं चालनम्। दैवज्ञचिंतामणौ। त्रिषूत्तरासु रोहिण्यां मृगे पुष्ये करे वसौ॥ मैत्राहिवारुणे पैत्र्ये पोतकर्मापि भे स्मृताः
॥८३॥ शुक्रगुरौ भौमवारेषु॥ अथ वीराभिचारौ॥ मूलार्द्राभरणीपैत्र्येमृगसौम्ये घटेतनौ॥ क्रूरे शुक्रे॰ छमे मुद्दे सिद्धिर्वीराभिचा
रयोः॥८४॥ अथ रोगविमुक्तस्नानम्। ग्रामंनृपाणामथमं कं योज्य स्ववर्गांकं एकीकृत्य हरेत्। गजैरिततनोस्यात् तोदशांको भवेत् भू
यः स्वामी समांक एव शुभदो त्याज्योन्य दुःखप्रदः॥८५॥ तत्र यशोधरः। पूर्वासु जीवशिववन्हिहरित्रयेषु मूलाश्विवाईकिद्वि
दैवतमित्रभेषु। वारे च भूमितनयार्कजवाक्पतीनां स्नानं शुभं भवति रोगविमुक्तकानाम्॥८५॥ अन्यच्च॰ लग्ने चरे सूर्यकु
जे च वारे रिक्तातिथौ चन्द्रबले न हीने। केन्द्रत्रिकोणेषु भवंति पापैः स्नानं हितं रोगविमुक्तकानाम्॥८६॥ अथ कोशसंग्रहः। त
न्नन्तसिंहः। रौद्रश्रवणपुष्येन्दुमैत्रवासववारुणम्। त्रीण्युत्तराणि हस्तश्च कोशसंग्रहणे शुभाः॥८७॥ अथ आरामजलाशयसुर राम॰
प्रतिष्ठा॰ जलाशयारामसुरप्रतिष्ठा सौम्यायने जीवशशांकशुक्रे। दृश्ये मृदुक्षिप्रचरध्रुवे स्यात् पक्षे सिते स्वर्क्षतिथिक्षणे ५

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वा॥८८॥रिक्तारवर्ज्जैर्दिवसेतिशस्ताशशांकपापैःत्रिभवङ्गसंस्थैः।व्ययाष्टांत्यगैःसत्तवचरैर्मृगेन्द्रेसूर्य्येघटेकोप्युवतौचविष्णुः
॥८९॥शिवोनृयुग्मेद्वितनौचदेव्याःक्षुद्राचरेसर्वइमेस्थिरर्क्षे।पुष्येग्रहाविघ्नपसर्प्पयक्षभूतादयोन्त्येश्रवणेजिनश्च॥
९०॥अथनवपर्णफलाद्यशनं॥चण्डेश्वरः।मूलाश्विमैत्रकरतिष्यहरीन्दुभेषुपौष्णोत्तरेत्त्यथपुनर्वसुवासवेषु।वारेषुभू
मितनयार्कजवर्जितेषुतांम्बूलनूतनफलाद्यशनंहिताय॥९१॥अथद्रव्यप्रयोगः॥तत्ररामः॥स्वात्यादित्यमृदुद्विदैवगुरु
भेकर्णत्रयेश्वेचरेलग्नेधर्मसुताष्टशुद्धिसहितेद्रव्यप्रयोगःशुभः।नाद्याप्यसृणंतुसंक्रमदिनेवृद्धौकरेऽर्केन्द्रियतद्दूंशेषु
भवेद्दणंनचबुधेदेयंकदाचिद्धनम्॥९२॥अथस्वर्णादिधारणम्।रेवत्यांवासवेदास्रेतथाहस्तादिपंचके॥नारीणांबुधपुष्ये
शुक्रार्केगुरौस्वर्णादिधारणम्॥९३॥अथभैषज्यकर्माणि॥हस्ताश्विपूषगुरुवासवमूलमैत्रचित्रादितीन्दुहरिवारुणवायु
भेषु।वारेषुसूर्य्यबुधभार्गववाक्पतीनांभैषज्यभक्षणविधिःशुभदोनराणां॥९४॥अथसूचीकर्म।वासवादित्तिभत्वाष्ट्रमैत्रमि
न्त्रवमाश्विनी।सूचीकर्मतनुत्राणमेभिर्ऋक्षैःप्रशस्यते॥९५॥श्रीपतिः।वासवोत्तरदलादिपंचकेयाम्यदिग्गमनगेहगोपन
म्।प्रेतदाहतृणकाष्ठसंग्रहःशय्यकावितननंचवर्ज्जयेत्॥९६॥अथनक्षत्रताराज्ञानमाह।तत्ररामः।त्रि३त्र्यं३ग६पंचा
५ग्नि३कु१वेद४वन्हयः३शरे५षु५नेत्रा२श्वि२शरे५न्दु१भू१कृता४।वेदा४ग्नि३रुद्रा११श्वि२यमा२ग्नि३वन्हयो३ब्ध्य
यःशतं१००द्वि२द्वि२रदा३२भतारकाः॥९७॥अश्वादिरूपंतुरगास्ययोनिंक्षुरेणपाश्वमपिगर्दहंच॥९षत्कचक्रेभवनंचमं
शय्याकरौमौक्तिकविद्रुमंच॥९८॥तोरणमणिनिभंचकुण्डलंसिंहपुच्छगजदंतमंचकाः॥अश्विचत्रिचरणाभमर्द्दलोद्

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मंचकुयमास्मर्ईलाः॥ ९९॥ अथरात्रिघटिकाज्ञानमाह॥ तरणेर्व्योममध्यस्थं नक्षत्रंचनगोमितं॥ नखघ्नंनवभिर्भक्तंरात्रौ
चगतनाडिकाः॥१००॥ अथदिवसघटिकाज्ञानमाह॥ पादच्छायार ⁻⁻ संयुताशशिनेत्रेन्दुकान्भजेत्॥ लब्धांकेघटिकाद्येय
शेषंफलमिहोच्यते॥१०१॥ अथप्रसंगेनदिनप्रमाणानयनम्॥ अयनादिवसादलितावसु ८ पंच ५ करा २ युता। दशाप्ताघटि
काश्चेयाशेषंफलमिहोच्यते॥१०२॥ अन्यच्च॥ अयनादिकवासरतामहतागगनानलवाणशशांकयुता। परिभाजितव्योमर

मे	वृ	मि	क	सिं	क	तु	वृ	ध	म	कुं	मी
३	४	५	५	५	५	५	५	५	५	४	३
४१	१३	४	४३	४५	३५	३५	४५	४३	४	१३	४१

सैर्घटिकामकरादिदिवाकरकादिनिशा॥१०३॥ इतिनक्षत्रप्रकरणम्॥ अथ
मेषादीनांदण्डपलानि॥ रामः ३ कच्छिमितामेषेचाब्ध्ययस्त्रिदलंवृषे। युग्मेपं
चाब्धयश्चैवपंचद्वाब्धिमितास्तथा॥१०४॥ कर्केचसिंहेवाणाश्चपंचाब्धयइ
तीरिताः। पंचरंडाश्चकन्यायांवाणरामपलानिच। उत्क्रमेणतुलादौस्याद्राशि
मानंप्रयोजयेत्॥१०५॥ श्रीर्जयतु॥ अथसमयशुद्धिः। तत्रवत्सरः। वक्रेचैवातिचारेत्रिदशपतिगुरौदैत्यपूज्येचलुप्तेगुर्वादि
त्येऽधिमासेदिवसकरविधौसंक्रमेचैत्रपौषे। दिष्ट्यांकेतूदयेवायदिक्रूरगुरौसिंहसंस्थेमघेज्येवर्षेलुप्तेचवाद्रुःसुनियतमर
णंदेवकन्यांवरस्य॥१०६॥ अन्यच्च॥ नीचस्थःसिंहगोवायदिभवतिगुरुःसूर्यराशौचलीनः॥ संप्राप्तोवायदास्ताद्राशगतए
णिनांक्षीणरूपोथवालः॥१०७॥ यात्रागेहंविवाहंक्रतिरमरविधिर्यत्तचूडादिसर्वंवापीचोद्यानकूपंनभवतिशुभदंपद्यदिष्टं
चलोके॥१०८॥ अतिचारगतेजीवेतंराशिंनैवचेत्पुनः॥ लुप्तसंवत्सरोज्ञेयःकुंभाजोसक्षषेर्विना॥१०९॥ सिंहेगुरौगतेकार्य्यः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नविवाहः कदाचन॥ मेषस्थोऽपि दिवानाथे सिंहस्थोऽपि शुभप्रदः॥११०॥ नर्मदापूर्वभागे तु शोणस्योत्तरदक्षिणे॥ गण्डक्याः
पश्चिमे भागे मकरस्थो न दोषभाक्॥१११॥ मृगराशिगते जीवे दिनषष्टिं परित्यजेत्॥ गर्गादिमुनयः सर्वे जगदुः सर्वकर्मसु
॥११२॥ वक्रे चैवातिचारे च अष्टाविंशतिवासरान्॥ वर्जयेत्सर्वकार्येषु केचिदाहुर्महर्षयः॥११३॥ अथ गुरुशुक्रयोर्वृद्धबाल्य
त्वमाह॥ वृद्धबाल्यं दशाहं च तथा सप्तदिनं परे॥ कैश्चित्त्र्यहं च ५ दिनं प्रोक्तं त्र्यहं प्रोक्तं तु कर्हिचित्॥११५॥ श्रीपतिः। जन्ममा
सि न च जन्मभे तिथौ नैव जन्मदिवसेऽपि कारयेत्॥ आद्यगर्भदुहितुः सुतस्य वा ज्येष्ठमासि न च मातुर्मङ्गलम्॥११६॥ द्वौ ज्येष्ठौ
मध्यमौ प्रोक्तौ एकज्येष्ठः शुभप्रदः॥ ज्येष्ठत्रयं न कुर्वीत विवाहः सर्वसम्मतः॥११७॥ अत्र रामः॥ चूडाव्रतं चापि विवाहतो व्रता
चूडा च नेष्टा पुरुषत्रयान्तरे। वधूप्रवेशाच्च सुतविनिर्गमः षण्मासतश्चाब्दविभेदतः शुभः॥११८॥ एकदिने मङ्गलदोषमाह॥
भ्रातृयुगे स्वसृयुगे कन्याभ्रातृयुगे तथा॥ न कुर्यान्मङ्गलं किंचिदेकस्मिन्नुद्वहेऽहनि॥११९॥ गर्भिणी यस्य वै माता मासादूर्ध्वं तु पं
चमात्॥ तस्य चूडोपनयने गर्भिण्यां वा शिशोर्मृतिः॥१२०॥ बध्वा वरस्यापि कुले त्रिपूरुषे नाशं व्रजेत्कश्च न निश्चयोत्तरम्॥ मा
सोत्तरं तत्र विवाह इष्यते शान्त्याथवा सूतकनिर्गमे परैः॥१२१॥ अथ कार्यविशेषग्रहशुद्धिः॥ रविशुद्धौ गृहकरणं रविगुरुशुद्धौ
व्रतोद्वाहौ॥ सौरं ताराशुद्धौ सर्वं चन्द्राश्रितं कर्म॥१२२॥ इति समयशुद्धिप्रकरणम्॥ अथ संस्कारादिप्रकरणम्॥ तत्र रजोदर्श
नस्नानं॥ तत्र रामः॥ हस्तानिलाश्विमृगमैत्रवसुध्रुवाख्यैः शाक्रान्वितैः शुभतिथौ शुभवासरे च॥ स्नायादथार्तवती मृगपौष्णवायु
हस्ताश्विधातृभिरलं लभते च गर्भम्॥१२३॥ अथ गर्भाधानं॥ गण्डान्तं त्रिविधं त्यजेन्निधनभं जन्मर्क्षमूलान्तकं दास्रं पौष्णमथो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ल॰ सं॰ ७

प्रागदिवसं पातं तथा वैधृतिम्॥ पित्रोः श्राद्धदिनं दिवा च परिघाद्यर्द्धं स्वपत्नीगर्भे भानूत्पातहतानि मृत्स्कभवनं जन्मर्क्षतः पाप
भम्॥१२४॥ भद्रा षष्ठी पर्व रिक्ताश्च संध्या ६।३०।९।१४ भौमार्कौ कीनाद्यरात्रिश्चतस्रः॥ गर्भाधानं त्र्युत्तरेंद्वर्कमैत्रब्राह्मस्वाती वि
ष्णुवस्वंबुपे सत्॥१२५॥ केन्द्रत्रिकोणेषु शुभैश्च पापैस्त्र्यायारिगैः पुंग्रहलग्नदृष्टे॥ ओजांशकेऽप्योजपि च युग्मरात्रौ चित्रा
दितीज्याश्विषु मध्यमं तत्॥१२६॥ अथ सीमंतपुंसवनविष्णुपूजा॥ जीवार्कारदिने मृगेज्यनिर्ऋतिः श्रोत्रादितिब्राह्मभे शि
क्ता ४।९।१४॥ मा ३० कर सा६ष्ट८ वर्जे तिथिभि १ ८र्मासाधिपे पीवरे। सीमन्तोऽष्टमषष्ठमासि शुभदैः केन्द्रत्रिकोणे १।४।७।१०।
५।९ खलैः लाभारित्रिषु ११।६।३ वा ध्रुवान्तस्य देहे लग्ने च पुंभांशके॥१२७॥ मासेश्वरास्सितकुजेज्यरवीन्दुसौरिश्चन्द्रात्मज
स्तनुपचंद्रदिवाकरेषु। पूर्वोदितैः पुंसवनं विधेयं मासे तृतीये त्वथ विष्णुपूजा॥ मासेऽष्टमे विष्णुविधातृजीवे लग्ने शुभे मृत्यु
गृहे च शुद्धे॥१२८॥ अथ प्रसूतीस्नानं। पौष्णध्रुवेन्दुकरवातहयेषु प्रसुतीस्नानम्। समैत्ररवीज्यकुजेषु शस्तम्॥ नार्द्रात्रयं
श्रुतिमघान्तकमिश्रमूलं त्वाष्ट्रं तु सौरिवसु ८ षट्दर्शवि १ रिक्ततिथ्यं॥१२९॥ अथ नामकर्म॥ दैवज्ञचिन्तामणौ॥ चित्रानु
राधावसुतिष्यमृगार्कविष्णुधातोत्तराश्विवरुणादितिरेवतीषु॥ केन्द्रस्थिते सुरगुरौ शुभदे विधेयं च कार्यं शुभेऽह्नि नियतं शिशु
जातकर्म॥१३०॥ जातकर्मोक्तनक्षत्रे केन्द्रगे गुरुभार्गवे॥ अह्नि एकादशे नाम कुर्याच्छुभदिने शिशोः॥१३१॥ द्वादशे दिवसे च
न्मे शुभदिवसे नामकर्म जगुः॥ अथ निष्क्रमणम्॥ ज्येष्ठादित्यकरोत्तराश्विविधुभे वातानुराधाहरौ पुष्यावार्द्धकिमूलवासवगु रा॰ म॰
रौम्यासे त्रितुर्ये ३।४। यवामन्दारोज्झितलग्नसौरे च धवले पक्षे शुभे राशिपे क्ष्मां दृष्टमकेंद्रकोणरहिते पापैस्त्रिशोनिः ८ कर्म। अ ७

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

थ अन्नप्राशनं। रेवत्याश्विपुनर्वसुहरियुगे ब्राह्म्यानुराधा गुरुः स्वाती भानुमघाविशाखरजनीनाथोत्तरात्वाष्ट्रभे। वारे सूर्यश।
शांकबोधनगुरौ शुक्रेज्यरिक्तेतिथौ अन्नप्राशनमीरितं मिथुनगे कन्याझषेसूरिभिः। षष्ठेमासिसितेपक्षेशुभैः केन्द्रत्रिकोण
गैः।१।४।७।१०।९।५। त्रिषडायगते क्रूरे चंद्रे सत्सरि वर्ज्जिते॥१३३॥ सप्तम्येकादशी पर्वद्वादशी वर्जिते तिथौ॥ शिशूनां शोभने
चंद्रेकारयेदन्नभक्षणम्॥१३४॥ अथ कर्णवेधः॥ ज्येष्ठादित्यसमीरणार्कशततभेपुष्येश्रविष्ठाश्विनीचित्रावैष्णववमित्रपौ।
ष्णामृगभेवारेबुधादित्रये। त्र्या३।११रि६गते खले च शुभदे केंद्रत्रिकोणस्थिते १।४।७।१०।९।५ वर्षेवायुजिकर्णवेधनविधिः
पक्षेसितेशोभने॥१३५॥ जन्मर्क्षे जन्ममासे च रिक्तापर्वानवमेषु च। भद्रायामशुभे चंद्रे नकुर्यात्कर्णवेधनम्॥ अथ चूडाक
रणमाह॥ गीर्वाणाम्बुप्रतिष्ठापरिणयदहनाधान्यगेहःप्रवेशाश्चौलं राजाभिषेको व्रतमपि च शुभं नैव याम्यायने स्यात्। नो
वा बाल्यस्तवार्द्धे सुरगुरुसितयोर्नैव केतूदये स्यात् संचारे चक्रे विज्जहति तमपरे याचदीसोन्तदग्ने॥१३६॥ तत्र दैवज्ञचि
न्तामणौ॥ रेवत्याश्विपुनर्वसूडुपतौ विष्णुत्रयेऽर्कत्रये सौम्ये वाकृतिभे च सौम्यदिवसे सूर्ये च सौम्यायने। केन्द्रे १।४।७।१०
द्वादशमृत्युकोणापा८।५।९ रहिते पापे शुभे केंद्रगे १।४।७।१० चुडा कुंभ११मृग१०कन्या३मिथुन३गो२मीने हयाङ्के शुभा॥१३७॥
नजन्ममासे न च जन्मभे तिथौ विधौ विरुद्धे शुभतारकासु। युग्माब्दमासे न च कृष्णपक्षे चूडा न कार्या खलु चैत्रपौषे॥१३८॥ षष्ठा६
ष्टमी८ द्वादशी१२ रिक्ता४।९।१४ पर्वा नवमेषु च। गलग्रहे च भद्रायां क्षुरकर्म न कारयेत्॥१३९॥ अथ नित्यक्षौरम्॥ श्रीपतिः
षट्६ कृत्तिकः पंच५ मघास्त्रिमैत्रा ब्राह्म्याष्टको८ ऽग्निः२ चतुरुत्तराश्च। सौरीस वर्षैर्जन्तुराननोपि न प्राणिनातिप्रकटप्रचारः॥१४

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥ येषु भेषु प्रशंसंति क्षौरकर्म्म महर्षयः॥ शंसंति तेषु भेष्वेव नखदन्तविलेखनम्॥१४१॥ अथाक्षरारंभः॥ गणेशविष्णुवा
ल॰सं॰ ८ ग्रमाः प्रपूज्य पंचमाब्दके। तिथौ शिवा११र्क१२दिक्१०द्वि२षट्६शर५त्रिके३रवावुदक्। लघुश्रवोऽनिलान्त्यभादितीश
तक्षमित्रभे चरोनसत्तनौ शिशोर्लिपिग्रहः सतां दिने॥१४२॥ अथ विद्यारंभः॥ मृगात्कराच्छ्रुतेस्त्रयेऽश्विमूलपूर्विकात्रये
गुरुद्वयेऽर्कजीवविच्छितेन्द्रिषट्६शर५त्रिके३शिवा११र्क१२दिक्१०द्विके२तिथौ ध्रुवान्त्यमित्रभे परैः शुभैरधीतिरु
त्तमा त्रिकोण९।५केन्द्र१।४।७।१०गैः स्मृता॥१४३॥ अथ धनुर्विद्योद्यमः दीपिकायाम्॥ अदितिगुरुयमार्कस्वातिचित्रामि
त्र्यर्क्षवह्निहरिवस्कमूलाश्वीन्दुभाग्यर्क्षकेषु॥ विशानिशारिबुधाहविष्णुबोधेऽपि पौषेषु समयतिथियोगे चापविद्याप्रधा
नम्॥१४४॥ अथ व्रतबन्धः॥ विप्राणां व्रतबंधनं निगदितं गर्भाष्टमे जन्मतो वर्षे वाप्यथ पंचमे क्षितिभुजां षष्ठे तथैकादशे॥
१४५॥ वैश्यानां पुनरष्टमेप्यथ पुनः स्याद्द्वादशे वत्सरे कालेऽथ द्विगुणे गते निगदितं गौणं तदाहुर्बुधाः॥१४६॥ अथ नक्षत्राणि
॥ पूर्वाषाढहरित्रयेऽश्विमृगभे हस्तत्रये रेवती ज्येष्ठापुष्यभगेषु चोत्तरगते भानौ च पक्षे सिते। गो२मीन१२मृगमदा६धनु९र्वे
नचरे५ शुक्रे गुरौ भास्करे पंचम्यां दशमीत्रये१०।११।१२ व्रतमिह श्रेष्ठं द्वितीयाद्वयोः॥१४७॥ रामः॥ कवीज्यचन्द्रलग्नपा रिपो
मृतौ व्रतेऽधमाः व्यया१२ कुभागवीतथा शनौ१ मृतौ८ सुते५ खलाः॥१४८॥ व्रतबन्धेऽष्ट८षट्६द्वि२र्९फ१२ वर्जिताः शोभनाः
शुभाः॥ त्रिषडाये३।६।११। खलाः पूर्णगो कर्कस्थो विधुस्तनौ॥१४९॥ वसिष्ठः॥ जीवोदये जीववर्गोदये वा जीवांशके जीवनि रामः
शीर्षते च। अल्पश्रुतोऽपि व्रतबंधने च धीशौ शास्त्रस्य भवति हि जेतृ॥१५०॥ रामः॥ कृष्णे प्रदोषेऽनध्याये शनौ निश्यपरान्हके॥ ८

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्राक्संध्यागर्जितेनेष्टो व्रतबन्धो गलग्रहे ॥१५१॥ कृष्णपक्षे चतुर्थी च सप्तम्यादिदिनत्रयम्॥ त्रयोदशी चतुष्कं च अष्टावेते
गलग्रहाः॥१५२॥ शुचिशुक्रपौषतपसां दिग्रविरुद्रार्क १०।२।११।१२ संख्यासिततिथयः॥ भूतादित्रितया १४।३०।१ष्टमे
संक्रमणं स्यात् व्रतेष्वनध्यायाः ॥१५३॥ गर्गः॥ अयने दक्षिणे चैव शयने बोधने हरेः॥ व्रतबन्धं न कुर्वीत मन्वादिषु युगादि
षु ॥१५४॥ युगादितिथयः॥ माघे पञ्चदशी कृष्णा नभस्ये च त्रयोदशी॥ तृतीया माधवे शुक्ला नवम्यूर्जे युगादयः॥१५५॥ म
न्वादितिथयः॥ अश्वयुजी शुक्लनवमी द्वादशी चोर्ज्जे मधौ तृतीया च॥ भाद्रपदे पि तृतीया श्रावणे मासि त्वमावास्या॥१५६॥ ए
कादशी च पौषे शुचिसिते दशमी सप्तमी च माघे॥ बहुलाष्टमी नभस्ये ष्याषाढी कार्त्तिकी च तद्वत्॥१५७॥ फाल्गुनसितपंचदशी
चैत्रज्येष्ठस्य पौर्णमासी च॥ मन्वंतरादयश्चेमाश्चतुर्दश प्रोक्ताः बुधैः पुण्याः॥१५८॥ बटुकन्याजन्मराशेस्त्रिकोणायद्विसप्तगं ५।९
११।२।७ श्रेष्ठो गुरुः ख १० षट् ६ त्र्याद्ये ३।१ पूजयान्यत्र निन्दित ४।८।१२।४०२ स्वोच्चे स्वभे स्वमैत्रे वा स्वांशे गर्गोत्तमे गुरुः॥ रि
ष्फाष्टतूर्यगो १२।४।८ पीष्टो नीचारिस्थः शुभोऽप्यसत्॥१५९॥ चैत्रे मासे भास्करे मीनसंस्थे कुर्यान्मौञ्जीबंधनं ब्राह्मणानां॥ शु
क्रस्यास्तं वाक्पतेर्नावलोक्यं नैव ग्राह्या चन्द्रगुर्वोश्च शुद्धिः॥१६०॥ मीने स्थिते ऽर्के द्विजपुङ्गवानां व्रतस्य बन्धं खलु मासि चैत्रे
॥ न गर्ज्जदोषो ब्दविरुद्धदोषो गलग्रहानध्ययनादिदोषः॥१६१॥ मीने गीर्वाणमंत्रिण्यथ दिवसकरे चन्द्रताराद्यशुद्धो चूडा
कर्मोपनीतं व्रतमिह नियतं प्रोच्यते गर्गमुख्यैः॥ गर्भाद्वर्षाष्टमे वा परिणयनविधिर्जन्मतो वापि सौरव्यं विद्यात त्वार्थवेत्ता
सुतधनसहितो भाग्ययुक्तोऽधिकारी॥१६२॥ इति व्रतबन्धः॥ अथाग्न्याधानम्॥ यशोधरः॥ रेवत्युत्तररोहिणीगुरुविधुज्ये

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ल·सं
९

वै	ज्ये	आ	श्रा	भा	कु	का	अ	पौ	मा	फा	चै
०	१५	१०	८	३	९	१२	०	११	७	१५	३
अमावास्या		१५	३०			१२ १५	अमावास्या				१५
शु		शु	कृ	शु	शु	शु	॰	शु	शु	शु	शु

मासाः१२ मन्वादितिथिपक्षशुक्लकृष्ण

वै	भा	का	मा	युगादितिथि
२	१३	९	३०	
शु	कृ	शु	कृ	पक्ष·शु० कृ०

र·	बु	शु	श	चं	मं	गु	रा	के	ग्र
३	३	३	३	२	३	३	३	२	०

ष्ठाविशाखाग्निभे जीवेशीतकरेकुजेऽथत रणौकेंद्रेत्रिकोणेथवा१।४।७।१०।९।५पा पेचोपचयस्थितेः३।१।६।११।१० शुभति थौलग्नेविधौशोभनेकुर्य्यादग्निपरिग्रहं सुरगुरौपुष्टेशुभेरात्रिपे॥१६३॥रामः॥सैकातिथिर्वारयुक्ताकृता४म्ना शेषेगुणे३भेभुविवन्हिवासः।सौख्याययहोमेशशि१युग्म२शेषेप्राणार्थनाशौ दिविभूतलस्थे॥१६४॥सूर्य्यभात्त्रि३त्रिभे३चान्द्रेसूर्य्यविच्छुक्रपङ्गवः।चन्द्रारेज्यागुशिखि नोनेष्टाहोमाहुतिःखले॥१६५॥अथराज्याभिषेकः॥दैवज्ञचिंतामणौ॥राशीशलग्नेशदशाधि नाथैःसूर्य्यारतारापतिभिर्बलिष्ठैः॥समुन्नतैर्भार्गवजीवचन्द्रेरिष्टोभिषेकश्चमहीपतीनां॥१६६ ॥रेवत्युत्तरमैत्रपुष्यहरिभेज्येष्ठाश्विनीरोहिणीचंद्रादित्यदिवाकरेशुभतिथौकेन्द्रत्रिकोणेशुभे॥१।४।७ १०।५।९।क्रूरेचो पचय३।६।१०।११स्थितेस्थिरगृहेवारेबुधादित्रयेचन्द्रेऽर्केचमहीभृतांमुनिवरैरुक्तोभिषेकःशुभः॥१६७॥अथदीक्षाका लः॥अस्मत्संग्रहे॥वैशाखेश्रावणेचैत्रेआश्विनेकार्तिकेतथा॥मार्गशीर्षेतथामाघेफाल्गुनेचशुभावहा॥१६८॥शैवागमे॥शु क्लपक्षेशुभादीक्षाकृष्णामध्यफलप्रदा।पंचमी५कादशी११शुक्लासप्तमी७चत्रयोदशी१३।५दशमी१०शुक्लपक्षस्यद्वादशी१२

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तुविशेषतः॥ तृतीया३ विहितानित्यंषष्ठीसर्वत्रनिन्दिता॥१६९॥ रामार्च्चनचन्द्रिकायाम्॥ रवौगुरौशनौसोमेकर्त्तव्याबुध
शुक्रयोः॥ अश्विनीरोहिणीस्वातीविशाखाहस्तभेषुच॥ ज्येष्ठोत्तरात्रयेषुवंकुर्य्यान्मंत्राभिषेचनम्॥१७०॥ तथाच॥ चित्रे
द्रेरेवतीपुष्यमृगाख्यंशततारकाः॥ धनिष्ठामित्रमघामूलश्रवणेसर्वदीक्षणम्॥१७१॥ शुभोदयेशुभैःकेन्द्रधर्मात्मज१।
४।७।१०।५।९।गृहास्थितैः॥ सर्व्वदीक्षाप्रशस्तास्यात्पापैश्चत्रिषडायगैः॥३।६।११॥ः॥१७२॥ अथमोक्षदीक्षा॥ श्रीपतिः॥ देवा
चार्य्येकर्म१०भावप्रपन्नेपापैर्धर्म्मे।९स्थानगैर्वीर्य्यहीनैः॥ योगेप्रवज्र्याह्वयेसुस्थिरेचकार्यातज्ज्ञैस्तत्रदीक्षामुमुक्षोः॥१७३
॥सिद्धिनिःश्रेयसे॥ निन्दितेष्वपिकालेषुदीक्षोक्ताग्रहणेशुभा॥ रविग्रहेसिद्धिदाशीघ्रंदीर्घेकालेशशिग्रहे॥१७४॥ अथविवा
हः॥ तत्ररामः॥ गुरुशुद्धिवशेनकन्यकानांसमवर्षेषुषडब्दकोपरिष्टात्॥ रविशुद्धिवशाच्छुभोवराणामुभयोश्चन्द्रविशुद्धि
तोविवाहः॥१७५॥ तत्रमैथिलः॥ रेवत्युत्तररोहिणीमृगमघामूलानुराधाकरस्वातीषुप्रमदातुलामिथुनगोलग्नेविवाहः
शुभः॥ मासाः फाल्गुनमाघमार्गशुचयोज्येष्ठस्तथामाधवः शस्ताःसौम्यदिनंतथैवतिथयोरिक्ताकुहूवर्जिताः॥१७६॥ अ
थवरकन्ययोः प्रीतिः। वर्णोयोनिश्चमैत्रीचग्रहाणांगणसंज्ञकम्॥ वर्गंचराशिकूटंचनाडीचैतेगुणाधिकाः॥१७७॥ तत्र
वर्णः॥ कर्कालिमीन४।८।१२ विप्रोमेषःसिंहो१धनु९र्नृपः॥ वृषः२कन्या६मृगो१०वैश्यः शूद्रोयुग्म३तुला७घटः११॥१७८
॥वर्णश्रेष्ठानुयानारीतस्याभर्तानजीवति॥ यदिजीवतिचेद्भर्ताविदेशनिरतःसदा॥१७९॥ अथयोनिः॥ अश्वःशतभिषाश्विन्यौरे
वतीभरणीगजः॥ छागेश्चकृत्तिकापुष्यौनागोचमृगरोहिणी॥१८०॥ आर्द्रामूलमपिश्वानौमूषकौभग-पैतृकौ॥ आदिस

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ल.सं. रिक्षौ मार्ज्जारौ आपो विष्णुश्च मर्कटौ॥१८१॥ अहिर्बुध्न्यार्यमणौ गावौ मित्रज्येष्ठा मृगौ तथा॥ वसुप्रोष्ठपदे सिंहौ हस्तस्वाती च
१० माहिषौ॥१८२॥ चित्राविशाखे व्याघ्राख्यौ अभिजिद्विश्वे च बभ्रुकौ॥ योनयः कथिता भानां वैरं मैत्रीं विचारयेत्॥१८३॥ श्रीपतिः
॥ गोव्याघ्रं गजसिंहमश्वमहिषं श्वानं च बभ्रूरगं वैरं वानरमेषयोश्च सुमहत्तद्वद्बिडालोन्दुरम्॥ लोकानां व्यवहारतोऽन्यदपि
चन्नात्वा प्रयत्नादिदं दम्पत्योर्नृपभृत्ययोरपि सदा वर्ज्यः शुभस्यार्थिभिः॥१८४॥ राश्याधिपो लघुजातके॥ कुज१ शुक्र२
ज्ञे३ इन्दु४ अर्क५ ज्ञ६ शुक्र७ कुज८ जीव९ सौरि१० यम११ गुरवः१२ मेषात्॥१८५॥ शत्रू मन्दसितौ समश्च शशिजो मित्राणि
शेषा रवेः॥ तीक्ष्णांशुर्हिमरश्मिजश्च सुहृदौ शेषाः समाः शीतगोः॥१८६॥ जीवेन्दूष्णकराः कुजस्य सुहृदो ज्ञोऽरिः सिता

॥ अथ मैत्रीचक्रं लिख्यते॥

र॰	चं॰	मं॰	बु॰	बृ॰	शु॰	श॰	ग्रहाः
चं॰बृ॰मं॰	र॰बु॰	र॰चं॰बृ॰	शु॰र॰	मं॰चं॰र॰	श॰बु॰	बु॰शु॰	मित्राः
बु॰	बृ॰मं॰ शु॰श॰	शु॰श॰	मं॰श॰बृ॰	श॰	मं॰बृ॰	बृ॰	समाः
श॰शु॰	००	बु॰	चं॰	बु॰शु॰	र॰चं॰	र॰चं॰मं॰	शत्रवः

र्कौ समौ॥ मित्रे सूर्यसितौ बुधस्य हिमगुः शत्रुः समाश्चापरे॥१८७॥ सू
र्ये सौम्यसितावरी रविसुतो मध्योऽपरे त्वन्यथा॥ सौम्यार्कौ सुहृदौ स
मौ कुजगुरू शुक्रस्य शेषावरी॥१८८॥ शुक्रज्ञौ सुहृदौ समः सुरगुरुः
सौरस्य वान्येऽरयः॥ इति ग्रहमैत्रीचक्रम्॥ अथ गणाः॥ तत्र श्रीपतिः
॥ हस्तस्वाती श्रुतिमृगशिरः पुष्यमैत्राश्विभानि पौष्णादित्ये जगुरिह ताम्र:
बुधा देवसंज्ञानि भानि। पूर्वास्तिस्रः शिवभरणी रोहिणीस्युत्तराश्च प्रा ८
दुर्मर्त्याख्यमुडुगणं नूनमेतन्मुनीन्द्राः॥१८९॥ [illegible] पित्र्यैन्द्रा सर्वे वासवास्य शक्राग्न्यो भैर्वरुणदहनसंश्च

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रक्षोगणोऽयम्। श्रेष्ठा प्रीतिः स्वकुलगणयोर्मध्यमा देवपुंसां मर्त्यैर्दैवैः सहरक्षसां वैरमाहुः॥१९०॥ अथ वर्गाः॥ तत्र रामः॥
अ८ क५ च६ ट४ त७ प११ य३ श२ वर्गाः खगेशमार्ज्जारसिंहश्वनाम्॥ सर्पाखुमृगावीनां निजपंचमवैरिणामष्टौ॥१९१॥ अथ
राशिकूटं रत्नमालायाम्॥ षट्६ काष्ट८ केमृत्यु२ पत्यहानिः पाणिग्रहः स्यान्नवपंचमेषु९।५ नैःस्वं धनं द्वादशके२।१२ प
रेषु प्रेमातिरेकोहि वधूवरस्य॥१९२॥ ग्रन्थान्तरे॥ एकाधिपत्ये समसप्तके वा लाभे तृतीये दशमे चतुर्थे॥ नाडीवियोगं गण
नेत्रभावं न चिंतयेद्दुद्वहनादिकाले॥१९३॥ ग्रहमैत्र्यत्वे राशिदोषो नास्ति॥ अथ नाडीचक्रम्॥ तत्र वसिष्ठः। आवृत्तिभिर्भै
स्त्रिभिराश्विभाद्यैः क्रमोत्क्रमाभ्यां गणयेदुडूनि। पदैकपर्वण्युभयोश्च धिष्ण्ये नेष्टा नृनार्योर्भृशमेकनाडी॥१९४॥ राश्यैक्येवि



द्भिन्नमृक्षद्वयं स्यान्नक्षत्रैक्ये राशियुग्मं तथैव॥ नाडीदोषो नो गणा
नांच दोषो नक्षत्रैक्ये पादभेदे शुभं स्यात्॥१९५॥ अथ पादवेधः। स्व
रोदये। आद्यांशेन चतुर्थांशं चतुर्थांशेन चादिमम्॥ द्वितीयेन तृतीयं
तु तृतीयेन द्वितीयकम्॥१९६॥ अथ विवाहदिवसशोधनम्॥ तत्रा
दौ दशयोगचक्रम्॥ सूर्यैक१ वेद४ ऋतवो६ दश१० रुद्र११ युक्ताः
पञ्चैक१५ नागशशिशिरांशु१८ नवैक१९ खाश्विः२० आद्यर्क्षतः श
शिदिवाकरभानियुक्तं भागं चरेयमुडुभिर्दशयोगचक्रम्॥१९७॥ वा

अ.	भ.	कृ.
आ.	मृ.	रो.
पु.	पु.	श्ले
उ.	पू.	म.
ह.	चि	स्वा.
ज्ये	अनु.	वि
मू.	पू.	उ.
श.	ध	श्र.
पू.	उ.	रे.
इति नाडीचक्रम्०॥		

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शुंववर्षाग्निभूपालचौरमृत्युज्वराः क्रमात्। वज्रवाणैःस्तिर्नूनं दशयोगफलं भवेत्। एतस्मिंतेशेषांके विवाहो निषिद्धः॥
१९८॥ अथ लत्ता॥ नक्षत्रं द्वादशं भानुस्तृतीयं लत्तया कुजः॥ षष्ठं जीवोऽष्टमं सौरिर्हन्ति दक्षिणतः सदा॥१९९॥ वामे
नसप्तमं चांद्रीन नवमं सिंहिकासुतः॥ पञ्चमं भृगुजो हन्ति द्वाविंशं पूर्णचन्द्रमाः॥२००॥ अथ पातः॥ अस्मत्संग्रहे। सूर्य्य
भात्सर्प्यमघा च चित्रा मैत्रं तथैव च॥ श्रवणो रेवती प्रोक्तं पातभं मुनिसंमतं॥२०१॥ अश्विनीभादितो गण्यं पातभं यदि सं
मलम्॥ तद्दिने च विवाहादि न कर्तव्यं कदाचन॥२०२॥ अथ युतिजामित्रदोषः। अन्त्रिः पापात्सप्तमगः शशिर्यदि भवेत्सा
पेन चेत्संयुतो यत्नेनापि विवर्ज्जयेन्मुनिमतो दोषोऽपि संकथ्यते। यात्रायां विपदोग्रहेषु मरणं क्षौरेऽथ रोगो महानुद्वाहे विध
वाव्रतेच्च मरणं मूलं च पुंस्कर्म्माणि॥२०३॥ तत्र विशेषः॥ पातयुक्तं च न सत्त्रं विवाहनक्षत्राच्चतुर्दशसम १४ विवाहे नेष्टं॥ अ
थ पंचशलाका॥ क्रूरैर्मुक्तं क्रूरगंतव्यम संक्रूराक्रांतं क्रूरविद्धं च नेष्टम्॥ यच्चोत्पातैर्भौमदिव्यान्तरिक्षैर्दुष्टं तद्वल्लूरलत्ताह
तं च॥२०४॥ चक्रे तस्मिन्नेकरेखास्थिते नक्षत्रे यं नूनं विद्धमसंग्रहेण॥ केचित्तस्मिन्प्रोच्यते पादवेधो भानां चिन्त्यस्तत्र लत्ता
निपातः॥२०५॥ उत्तराषाढस्यांत्यपादः श्रवणचतुर्दण्डकादौ अभिजिद्भुक्तिः॥ यस्या शशिः सप्तशलाकाभिन्नः पापैरपापै
रथवा विवाहे॥ उद्वाहवस्त्रेणतु सावृतांगी श्मशानभूमौ रुदती प्रयाति॥२०६॥ अथ खार्जुरचक्रम्॥ तत्र श्रीपतिः॥ व्याघात
मूलपरिघव्यतिपातपूर्वगंडातिगण्डकुलिशेषु सवैधृतेषु॥ आदित्यचन्द्रपितृसर्प्पभदस्रमूलमैत्रात्स्यतिष्यसुरवार्द्धकिभा
नि मूर्द्धि॥२०७॥ यस्मिन्दिने करेखायां सूर्य्यचन्द्रमसौ भवेत्॥ तद्विपातस्तयोस्तस्मिन्मंगलं च विवर्जयेत्॥२०८॥ अथवा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

णपंचकं॥ धार्य्यातिथिः १५ सूर्य्य १२ दृशा १० ष्ट८ वेदा ४ संक्रांतितो पातदिनैश्चयोज्या। ग्रहैर्विभक्ता यदि यत्र पञ्च ५ शेषो रुजाग्निर्नृपचौरमृत्युः॥ २०९॥ अथोपग्रहाः॥ भूकम्पः सप्त ७ मर्क्षं भवति सवितृभात्पञ्चमे ५ विद्युदुक्तः शूलं चैवाष्ट ८ संख्ये शनिरिति दशमे १० केतुरष्टादशे च १८ दण्डस्तिथि पञ्च १५ संख्ये सनव दश मितेनूनमुल्का प्रदिष्टा धिष्ण्याद्धिः सप्त संख्ये १४ मुनिभिरभिहितश्चात्र निर्घात पातः॥ २१०॥ भादेकविंशति २१ मितात्कथिता स्तमोह २१ निर्घात २२ कम्प २३ कुलि



अथसप्तशलाकाचक्रम्०

शाः २४ परिवेष २५ युक्ताः। एषित्वगेष्वनशुभं खलु कर्म्म कार्य्यसिद्धि मयाति दहनास्त्रविषादिकर्म्म॥ २११॥ अथक्रान्तिसाम्यम्॥ मुहूर्त चिन्तामणौ। पञ्चा ५ स्याजौ गो २ मृगौ १० तौलि ७ कुंभौ १२ कन्या ६ मीनौ १२ कर्का ४ ली ८ चाप ९ युग्मे ३ तत्रान्योन्यं चंद्रभान्वोर्निरुक्तं कान्तेः साम्यं नोशुभं मंगलेतत्॥ २१२॥ अथ पद्माचक्रम्॥ तत्र काशिनाथः॥ पद्माकारं लिखेच्चक्रमष्टकोणसमन्वितम्॥ यस्मिन् र्क्षे स्थितः सूर्य्यस्तदाद्यं मध्यमंत्रयं। त्रयं ३ त्रयं ३ च सर्वत्र ततः पूर्वादितो लिखेत्॥ अस्मत्संग्रहे। पक्षेद्वयोर्न्नशुभं धनलाभमत्स्यूदौर्भाग्यसंततिसुखे विधवान्यसक्ता। धान्यानि संचयकरी सुखसंपदाप्तिर्मध्यादितः फलमुशंति हसव्य



T
CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri



अथक्रान्तिसाम्यम्॰

मार्गे॥ २१४॥ अथकर्तरीयोगः॥ तत्र वाराहः। द्वयोः पापग्रहोर्मध्ये चन्द्रलग्नो भविष्यतः तदाम
त्युर्विजानीयात्स्वज्ञान्देनात्र संशयः॥ २१५॥ सौम्ययोगात्कर्तरीयोगो न स्यात्। वसिष्ठः। एकार्ग
लोपग्रहपातलत्तजामित्रकर्तर्युदयास्तदोषाः॥ नश्यंति चंद्रार्कबलोपपन्ने लग्ने यथार्कोस्युद
ये तु दोषाः॥ २१६॥ उपग्रहर्क्षं कुरुवाल्हिकेषु कलिङ्गवङ्गेषु च पातितं भं॥ सौराष्ट्रशाल्वेषु च लत्ति
तं भं त्यजेत्तु विद्धं किल सर्वदेशे॥ २१७॥ मुहूर्तचिन्तामणौ॥ जन्मलग्नभयोर्मृत्युराशौ नेष्टः करग्र
हः॥ एकाधिपत्ये राशीशे मैत्रे वा नैव दोषकृत्॥ २१८॥ श्रीपतिः। उदय
गतनवांशे स्वेशहष्टो युतो वा न भवति यदि मृत्युः स्यात्तदानीं वरस्य।

अथपद्माकारचक्रम्॰

परिणयसमये चेल्लेवास्तोदयेशः स्वपतिसहितदृष्टो मृत्युकारी च वध्वाः॥ २१९॥ विवाहपट
ले। भौमे लग्न १ कलत्र ७ नैधन ८ गते शुक्रारि ६ सप्ता ७ ष्ट गे चन्द्रे रन्ध्र ८ विलग्न १ षष्ठ ६ निरते
लग्ना १ स्तगे ७ भास्करे॥ तद्वद्भानुसुते १। ७ गुरौ निधनगे ८ सौम्येष्ट ८ जामित्रगो ७ जायां ७ भो
धि ४ विलग्न १ कर्म १० निरते राहुर्न पाणिग्रहः॥ २२०॥ रामः॥ पापौ कर्तरिकारिकौ रिपुगृहे नी
चे स्तगौ कर्तरीदोषो नैव सिते ७ रिनीचग्रहगतत्वषष्ठ ६ दोषोपि न। भौमेऽस्तेरिपुनीचभे नहिम
वेह्नौ मोष्ट ८ मोदोषकृन्नीचे नीचनवांशके शशिनि रिष्फा १२ ष्टा ८ रिदोषोपि न॥ २२१॥ श्रीपतिः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

।हिबुक४ धर्म९सुतो५ऽय१ कर्म्मसु१० त्रिदशराजगुरौ यदि वा सिते। यदशुभं शुभतां समुपैति तच्छुभफलं नितरामभि
वर्द्धते॥२२२॥ अब्दायनर्तुतिथिमासभपक्षदग्धास्तिथ्यन्धकाणबधिरांगमुखाश्च दोषाः॥ नश्यन्ति विद्गुरुसितेष्विह के
न्द्रकोणे तद्वच्च पापविधुयुक्तनवांशदोषाः॥२२३॥ लग्नाधिपं विना द्यूने सर्वे खगा नेष्टाः॥ अथ गोधुली॥ नास्मिन्नक्षं न तिथि
करणं नैव लग्नस्य चिन्ता नो वा वारो न च लववि धिर्नो मुहूर्तस्य चिन्ता। नो वा योगो न मृतिभवनं नापि जामित्रदोषो गोधूलिः
सा मुनिभिरुदिता सर्वकार्येषु शस्ता॥२२४॥ ग्रन्थान्तरे॥ लग्नं यदा नास्ति विशुद्धमन्यद्गोधूलिकं साधु तदा वदन्ति। लग्ने वि
शुद्धे सति वीर्ययुक्ते गोधूलिकं नैव वदन्ति सन्तः॥२२५॥ रामः॥ अस्तं याते गुरुदिवसे सौरे सार्के लग्नान्मृत्यौ रिपुभवने च
न्द्रे कन्यानाशः तनुमदनमृत्युस्थे भौमे वोढुर्नाशो लाभे११ धनसहजे३ चन्द्रे सौख्यम्॥२२६॥ अथ वधूप्रवेशः॥ समाद्विप
ञ्चाङ्कदिने विवाहाद्वधूप्रवेशोऽष्टि१६दिनान्तराले। शुभः परस्ताद्विषमाब्दमासे दिने ऽक्ष५ वर्षात्परतो यथेष्टम्॥२२७॥ अथ
प्रवेशनक्षत्राणि॥ ध्रुवक्षिप्रमृदुश्रोत्रवसुमूलमघानिले। वधूप्रवेशः सन्नेष्टो रिक्ता४।९।१४ रार्के१२ बुधेपरैः॥ अथ द्विरा
गमः॥ दैवज्ञचिन्तामणौ॥ ज्येष्ठापुष्यपुनर्वसूत्तररोहिण्युत्तराानुराधाश्विनीहस्तादित्रयपौष्णमूलमृगभे मेषालिकुंभे रवौ॥ क
न्यातौलि७ नृयुग्म३ मीन१२ मकरे१० लग्ने च यात्रातिथौ नारीणां शुभदो द्विरागमविधौ जीवज्ञशुक्रे ऽहनि११ शुक्लेपक्षे
स्यमिति॥ अथ पुंनार्योः प्रथमसमागमे॥ उत्तरात्रयरोहिण्यां पुष्ये मैत्रे करे मृगे॥ चित्रा स्वाती विशाखासु पुंनार्योः संगम
शुभः॥२२८॥ कन्या६ वाणिक७ मीन१२ गो२ ऽलि८ भवने केन्द्रस्थिते सद्ग्रहे पापे विक्रम३ लाभ११ वैरि६ सहिते द्यूने७ शुभैरी

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्थिते। वारे सौम्य दिने ध्वविष्टिकरणे पात्से च रिक्ताष्टमे राकामारहिते तिथौ शुभ विधौ दारोपभोगः स्मृतः॥२२९॥ दैत्येज्यो ह्यभि
ल·सं· मुख दक्षिणे यदि स्याद्गच्छेत्पुनर्हि शिशुगर्भिणी नवोढा॥ बालश्च हूजति विपद्यते नवोढा चेद्वन्ध्या भवति च गर्भिणी त्वग
१३ र्भा॥२३०॥ नगरप्रवेशविषयाद्युपद्रवे करपीडने विबुधतीर्थयात्रयोः॥ नृपपीडनेन नववधूप्रवेशने प्रतिभार्गवो भवति दो
षकृन्नहि॥२३१॥ पित्र्ये गृहे चेत्कुचपुष्पसंभवस्तदा न दोषः प्रतिशुक्रसंभवः॥ भृग्वङ्गिरोवत्सवसिष्ठकश्यपात्रीणां भरद्वा
जमुनेः कुले तथा॥२३२॥ इति लघुसंग्रहे विवाहद्विरागमप्रकरणम्॥ अथ द्वांगयात्रायां राहुविचारः॥ अलिधनुमकरार्के पू
र्वसंस्थे च राहुर्घटशफरतथाब्जे दक्षिणे सैंहिकेयः॥ वृषमिथुनकुलीरे पश्चिमे दिग्विभागे हरियुवतितुलायां चोत्तरे द्वांगराहुः
॥२३३॥ सोमदत्तः॥ अग्रतो राहुर्वैधव्यं दक्षिणे सुतहा भवेत्॥ पृष्ठे पुत्रनतीप्रोक्ता वामे सौभाग्यदायिनी॥२३४॥ यस्याम्भृगु
र्दक्षिणसन्मुखस्थो यस्यां दृशी नाम सुभोगमे सदा॥ तथैव राहुः परिकल्पनीयो द्वांगनकार्ये भृगुजाद्विलोमम्॥२३५॥ अथ या
त्राप्रकरणमारभ्यते॥ तत्र रामः॥ न षष्ठी न च द्वादशी चाष्टमी नो सिताद्या तिथिः पूर्णिमा नैव रिक्ता॥ हयादित्यमैत्रेन्दुजीवान्त्यह
स्तः श्रवो वासवैरेव यात्रा प्रशस्ता॥२३६॥ पूषभात्कृत्तिकाद्यपादे चन्द्रो व्यन्नस्थितः॥ तावच्छुक्रो भवेदन्धः सन्मुखे गमने शु
भः॥२३७॥ अथ सर्वांगी॥ तिथिवारञ्च नक्षत्रं नामाक्षरसमन्वितम्॥ द्वि२ त्रि३ चतुर्भिर्गुणितं सप्ता७ष्ट८रस६भाजितम्॥२३८
॥ आदिशून्ये भवेद्धानिर्मध्यशून्ये रिपोर्भयम्॥ अन्त्यशून्ये भवेन्मृत्युः सर्वांगी विजयी भवेत्॥२३९॥ श्रीपतिः॥ मूर्तिः१ कोशो२ रामः
धन्विनो३ वाहनानि४ मंत्रः५ शत्रुः६ मार्गो७ आयु८र्मनश्च९ व्यापार१० श्च प्राप्ति११ रप्राप्ति१२ रेवं लग्नात् भावाद्वादशैते १३

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विचिन्त्याः॥२४०॥ घ्नंतिक्रूरास्त्वायारिवर्ज्यंहिभावान्न्यापारंनिघ्नतःसूर्य्यभौमौ॥ सौम्याःपुष्यंत्येवहित्वारिभावंशुक्रश्चा
स्तंमृत्युमूर्तिस्तथेन्दुः॥२४१॥ आयारिषुयमारौचेत्क्रुक्तिभाजःशुभग्रहाः॥ प्रयाणेनृपतेर्यस्यहस्तस्थातस्यमेदिनी॥१४२
॥गुरुर्लग्नेरविःषष्ठेरन्ध्रेनेन्दुस्त्वगच्छतः॥ यस्यतस्यारिसेनाग्रेखलमैत्रीवनस्थिरा॥२४३॥ गुरौकेन्द्रे१।४।७।१० त्रिको
णे५।९ चरवौलाभे११ चकर्मणि१०॥ कल्याणयोगोभूपस्ययातुःकल्याणकृद्भवेत्॥२४४॥ ग्रन्थान्तरे॥ लग्नारिकर्म्महिबु
केषुशुभेष्सितज्ञेद्यूनान्त्य — लग्नरहितेष्वशुभग्रहेषु॥ यातुर्भयंनभवतिप्रतरेत्समुद्रंपद्मस्मनाकिमुतवारिसमागमेन
॥२४५॥ श्रीपतिः॥ एकेनापिज्ञास्फुजिद्वाक्पतीनांयोगःप्रोक्तःकेन्द्रधर्मात्मजेषु१।४।७।१०।९।५ द्वाभ्यामेषांवाधियोगा
भिधानंनूनंसर्वैरेवयोगाधियोगः॥२४६॥ योगेनयेनृपतयोरिगृहंव्रजंतिक्षेमेनतेगमनमागमनंचकुर्युः॥ क्षेमंयशो
रिपुविनाशमथाधियोगेयोगाधियोगेजयेद्धरित्रीम्॥२४७॥ जननसमयलग्नान्नैधनेजन्मभाद्वानिजरिपुभवनाद्वाशत्रु
भेलग्नयाने। पतिभिरुदितदोपैर्लग्नगैःपार्थिवानांगमनमथविषंवाभक्षणंतुल्यमेव॥२४८॥ रत्नकोशे॥ षष्ठाष्टमांत्या
१२स्तगतेविलग्नपेयात्रानरेयाशुभदैरपिग्रहैः॥ विनश्यतेषांफलमत्रलग्नपोमृत्युंकरोत्येवयतोहिभूपतेः॥२४९॥ ल
ग्नाधिपेसूर्य्यसुतेचनीचगेपुराजितेनैधनशत्रुगेहे॥ एवंनृपोयात्सरिराजयोगेप्राप्नोतिमृत्युंयवनावदन्ति॥२५०॥ अथ
प्रस्थानविधिः॥ गृहाद्गृहांतरंगर्गःसीम्नःसीमांतरंभृगुः॥ शरक्षेपाद्भरद्वाजोवसिष्ठोनगराद्बहिः॥२५१॥ प्राच्यामहानिमुन
यःप्रवदन्तिसप्तयाम्यामतीवशुभदानिदिनानिपञ्च॥ त्रीण्येवपश्चिमदिशिक्षितिनायकानांप्रस्थानकेषुदिवसद्वयमुत

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ल॰सं॰ रेस्यात्॥२५२॥ भुक्त्वागच्छति यद्दिने तैलगुडक्षीरपक्वमांसानि॥ विनिवर्त्तते स रुग्णः स्त्रीद्विजमपमानमृत्युः॥२५३॥ शकु
१४ नादिकं ग्रन्थविस्तारभयान्न लिखितं यतो बालानां ग्रन्थविस्तारो दुस्तरः॥ अन्यद्धन्याहरवगम्य विरुद्धशाकुनं विचार्य्य व्रजेत्॥
सौदामिनीवर्षणवर्ज्जितेषु नाकालजेषु प्रवसेन्नरेंद्रः। आसप्तरात्राध्रुवमद्भवेषु दिव्यांतरिक्षसंस्थितिजेषु चैवम्॥२५४॥ इति
लघुसंग्रहे यात्राप्रकरणम्॥ तत्र रामः॥ यद्धाम्नं २ कु ९ मुते ५ श ११ द्वि म्मित १० म सौग्रामः शुभो नाम भात्स्ववर्गो द्विगुणं विधा
यपरवर्गाद्यं गजैः सेवितम् काकिन्यस्त्वनयोश्च तद्विवरतो यस्याधिकः सोऽर्थदः॥२५५॥ अथ हारा। द्विज ८ वैश्य २।६।१०
शूद्र ३।७।११ नृप १।५।९ राशौ नां हितं पूर्वतः गोर २ सिंह ५ नक्र १० मिथुनं ३ निवसेन्न मध्ये ग्रामस्य पूर्वं कक्कुभोलि ८ झषा १२ ङ्ग
नाश्व ६ ककौ ४ धनु ९ स्तुलभ ७ मेष १ घटा ११ श्चतद्दुर्गाः स्वपञ्चमपरा बलिनः स्युरेन्द्राः॥२५६॥ एकोनितेष्टर्क्षहता द्वित्ति
घ्यो रूपोनितेष्टायहतेन्दुनागैः ८१॥ युक्ता घनेश्चापि पृथुता विभक्ता भूपाश्विभिः २१६ शेषमितो हि पिण्डः॥२५७॥ स्वेष्टायन
स्त्रभवोऽथवेद्यर्क्षहृत्स्याद्विस्तृतिविस्तृतिहृच्च दैर्घता॥ आ या ध्वजो धूम्र हरि श्व गो खर भ ध्वांक्षकाः पिण्डद्विहाष्टशेषि
ते॥२५८॥ अस्मत्संग्रहे॥ पिंडे नवा ९ ष्टा ८ ग्नि ३ गजा ८ ष्ट ८ संख्यैः क्रमेण गुण्यः खलु पञ्चधा वा॥ विभाजिते ष्टा ८ र्क १२ रा
जा ८ र्क्ष २७ स्वार्के १२ ८ रायो धनक्षेमगृहायुरुक्तम्॥२५९॥ ध्वजो धूम्रोऽथ सिंहश्च सौरभेयः खरो गजः॥ ध्वांक्षश्चेति क्रमे
णैव दायाष्टकमुदाहृतम्॥२६०॥ रामः॥ ध्वजादिकाः पूर्वदिशि ध्वजे मुखं कार्यो हरौ पूर्वयमोत्तरे तथा। प्राच्यां वृषे प्राग्यमयो रामः
गजेऽथवा पश्चादुदक्पूर्वयमो द्विजादिसः॥२६१॥ [illegible] ईरितोऽसौ ध्रुवाऽदिनामा स्वरयुक् स पिण्डः॥ तत्रो गुणे १४

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

बिन्दूकृतान्तभूपाद्यसाभये युन्नेशुभोन्तकोऽत्र ॥ २६२ ॥ दिक्षु पूर्वादितो शाला ध्रुवा भू १ द्वौ २ कृतो ४ गजाः ८ शाला ध्रुवाद्यैः
संयोगः सैको वेश्म ध्रुवादिकम् ॥ २६३ ॥ श्रीपतिः ॥ ध्रुवञ्च १ धान्यञ्च २ जयञ्च ३ नन्दः ४ खरञ्च ५ कान्तञ्च ६ मनोरमञ्च
७ सुवक्त्रसंज्ञं ८ खलु दुर्मुखाख्यं ९ क्रूरं १० विपक्षं ११ धनदं १२ सयञ्च १३ ॥ २६४ ॥ आक्रन्द १४ संज्ञं विपुलाख्यं च १५
स्यात्षोडशे तद्विजया १६ भिधानम् ॥ वास्त्वारम्भेन सत्राणि ॥ यशोधरः ॥ ध्रुवहरिमृदुपुष्यः स्वातिहस्तानुराधादितिवरुणधनि
ष्ठामूलभे सौम्यवारे । उपचयगृहसंस्थैः पापगैः केन्द्रकोणे १।४।७।१०।९।५ बुधगुरुभृगुपुत्रैर्वेश्मकार्यं प्रशस्तम् ॥ २६ ॥ ति
थ्यावरिक्ते शुभदे निशाकरे योगे शुभे लग्नगते स्थिरे भे ॥ द्व्यंगे च ३।६।९।१२ कर्तुः शुभदे विलग्ने पापग्रहैः संत्सु विवर्जिते गृहे ॥
२६६ ॥ वैशाखे श्रावणे मार्गे फाल्गुने च विशेषतः ॥ पत्नीपुत्रार्थलाभः स्याद्गृहकर्तुर्न संशयः ॥ २६७ ॥ कृष्णपक्षे शुभं त्तेषु
क्रूसर्वसमृद्धिःस्यषष्ठ्यष्टमी वास्तुकार्ये निषिद्धाः परिकीर्तिताः २६८ ॥ कर्क ४ नक्र १० हरि ५ कुंभ ११ गते ऽर्के पूर्वपश्चिममुखा
नि गृहाणि ॥ तौलि ७ मेष १ वृष २ वृश्चिक ८ जाते दक्षिणोत्तरमुखानि च कृत्वा ॥ २६९ ॥ पूर्वपश्चान्मुखं गेहं न लग्नात्मकरो चि
धौ ॥ सौम्ययाम्यमुखं गेहं न कुर्यात्सातालखेगते ॥ २७० ॥ रवौ गृहस्थो बहिणी शशांके धनं सिते देवगुरौ च सौख्यम् ॥ वि
नाशमायाति बलेन हीने नीचस्थिते वास्तकगे पागते च ॥ २७१ ॥ सूर्य्यभाद्गणये द्वास्तुचक्रं च दिनभावधि ॥ अम्बरे ७ शा १२
स्वरैः १० प्रोक्तमसत्तत्फलं बुधैः ॥ २७२ ॥ कुजे वास्त्वोर्मध्यदेशे ऽर्थहानिस्त्वीशानादौ पुच्छिरे स्वर्य्यवृद्धिः ॥ नाभौ सूनोः स्त्री
विनाशोस्ति स्वस्य तस्मीडाशत्रुतः स्याच्च सौख्यम् ॥ २७३ ॥ देवालये गेहविधौ जलाशये राहोर्मुखं शंभुदिशो विलोमतः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ल॰ सं॰ मीनार्कसिंहार्कमृगार्कतस्त्रिभेखातोमुखात्पृष्ठविदिक्शुभोभवेत्॥ २७४॥ ईशानवायव्यक्रमेण प्लवविचारः। पूर्वप्लवो
१५ वृद्धिकरो धनदश्चोत्तरे प्लवः॥ याम्यां रोगप्रदो ज्ञेयो धनहा पश्चिमे प्लवः॥ २७५॥ नवभागं गृहं कृत्वा पंचभागं तु दक्षिणे॥
त्रिभागास्तूत्तरे कार्य्याः शेषं द्वारं प्रकीर्तितं॥ २७६॥ अथ प्रवेशः॥ ———॥ तत्र वसिष्ठः॥ अथ प्रवेशो नवसद्मनस्तु सौम्या
यने जीवसिते वलाढ्ये॥ सिते च पक्षे शुभवासरे च वास्त्वर्चनं भूतबलिं विधाय॥ २७७॥ माघेऽर्थलाभः प्रथमः प्रवेशः पुत्रा
र्थलाभः खलु फाल्गुने च। चैत्रेऽर्थहानिर्धनधान्यलाभो वैशाखमासे सुखपुत्रलाभः। ज्येष्ठे तु मासेषु परेषु नूनं हानिप्रदः श
त्रुभयप्रदश्च॥ २७८॥ जीर्णे गृहेऽग्न्यादिभयान्नवेऽपि मार्गोर्ज्जयोः श्रावणकेऽपि सत्स्यात्॥ वेशोऽम्बुपेज्यानिलवासवेषु ना
वश्यमस्तादिविचारणात्र॥ २७९॥ अथ प्रवेशनक्षत्राणि॥ हस्तः पुष्यपुनर्वसू शततभिषास्वातीतथा रेवती रोहिण्युत्तरभं

मुखे	पूर्वपार	दक्षि	पश्चिम	उत्तरा	गर्भे	गुदे	कण्ठ
१ दाहः	४ उद्वसनं	४ लाभं	४ श्रीः	४ कलिः	४ नाशः	३ स्थैर्यं	३ सौख्यं

त्रयं हरिमृगौ मूलं धनिष्ठा तथा॥ कन्याकुंभमृगालिसिंहमिथु
नस्थस्सूरास्तुद्धमे वारा जीवशनित्सोमभृगुजा वेश्मप्रवेशे
शुभाः॥ २८०॥ तत्र गुरुः॥ नन्दा भद्रा जया चैव पूर्णा च तिथयः
शुभाः॥ अमावास्या च रिक्ता च वर्जनीयाः प्रयत्नतः॥ २८१॥ श्री
पतिः। त्रिकोण ९।५ केन्द्रगैः १।४।७।१० शुभैरकण ६ काष्टमंत्यगैः ८ असद्ग्रहैः स्थिरोदये गृहं विशेद्दले विधौ॥ २८२॥ अथ कुंभ रामः
चक्रम्। रामः। वक्त्रे भूरविभात्प्रवेशसमये कुम्भेऽग्निदाहः कृताः ४ प्राच्यामुद्वसनं कृता ४ यमगता लाभः कृताः ४ पश्चिमे॥ १५

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रीवेदा४ कलिसत्तरे युगमिता गर्भे विनाशो गुरुद्रामः स्थैर्यमतः स्थिरत्वमनलाः कंठो भवत्सर्वदा ॥ २८३ ॥ इति श्रीलघुसं
ग्रहे लक्ष्मीनारायणकृते वालरिष्टप्रकरणम् ॥ अथ जातकाध्यायः ॥ लघुजातके । षष्ठेष्टमे वा चन्द्रः सद्यो मरणाय पापसंदृ
ष्टः । अष्टाभिः शुभदृष्टो वर्षैर्मिश्रैस्तदर्द्धेन ॥ २८४ ॥ सुत५ मदन७ नवां९ न्त्य१२ लग्न१ रन्ध्रे८ ष्वशुभयुतो मरणाय शीतरश्मिः
॥ भृगुसुतशशिपुत्रदेवपूज्यैर्यदि बलिभिर्न युतोऽवलोकितो वा ॥ २८५ ॥ एकोपि पापोऽष्टमगः शत्रुगृहे पापवीक्षितो वर्षा
त् ॥ मारयति नरं जातं सुधारसो येन पीतोपि ॥ २८६ ॥ लग्नाधिपजन्मपतौ षष्ठाष्टम८ रिःफ१२गैः प्रसवकाले । अस्तमितो
मरणकरो शशिप्रमितैर्वदेद्वर्षम् ॥ २८७ ॥ जातकाभरणे ॥ राहुर्भवेज्जन्मनि केन्द्रवर्ती क्रूरग्रहै श्चापि निरीक्ष्यमाणः ॥ भ
वंति वर्षैर्दशभिर्विनाशं वदंति वा षोडशकैश्च केचित् ॥ २८८ ॥ अथ शुभप्रयोगः ॥ पक्षे सिते भवति जन्म यदि क्षपायां कृ
ष्णेतथाहनि शुभाशुभदृश्यमानः ॥ तं चन्द्रमा रिपुविनाशगतोपि यत्नादापत्सु रक्षति पितेव शिशुं न हन्ति ॥ २८९ ॥ एको
पि यदि केन्द्रस्थो भार्गवो वाङ्गिरसां पतिः ॥ नवमे वा सुतस्थाने सर्वारिष्टं निवारयेत् ॥ २९० ॥ लग्नाधिपो वा जीवो वा शुक्रो वा
यदि केन्द्रगः ॥ तस्य पुरुषस्य दीर्घायुः संभवेद्राजपूजितः ॥ २९१ ॥ यदा वीक्षितो यामिनीशो दिनेशं बुधश्चापि शीतांशुसुदृ
क्षितश्च । तदा ज्योतिषान्येन गण्येन किं स्यात् स जातो भवेदीश्वरो दीर्घजीवी ॥ २९२ ॥ लघुजातके ॥ रविवर्ज्यं द्वादशगैरनफाच
न्द्राद्द्वितीयगैः सुनफा ॥ उभयस्थितैर्दुर्धराके केमद्रुमसंज्ञकश्चान्ये ॥ २९३ ॥ सच्छीलं विषयसुखान्वितं प्रभुत्वमातिसुक्रम
नफायां ॥ सुनफायां धीधनकीर्तियुक्तमात्मार्जितैश्वर्यं करोति ॥ २९४ ॥ बहुमत्तं कुटुम्बारंभोनित्यमुद्विग्नमपि दुर्धराख्यो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रविभा

ल॰सं॰ १६ मृत्सकं दुःखितमधनं यातं केमद्रुमे विद्यात्॥२९५॥ जातकाभरणे॥ तत्र डिंभाख्यचक्रविचारः। डिंभाख्यचक्रे रविभा

स्वभानां त्रयं न्यसेन्मूर्ध्नि मुखे त्रयं च ३। द्वे स्कंधयोर्द्वे २ भुजयोर्द्वे येच पाणिद्वये वक्षसि पंच भानि। नाभौ च लिंगे च तथै

कमेकं जान्वोर्भषट्कं परिकल्पनीयं। पादद्वये भंद्वितयं क्रमेण मुनिप्रवर्यैः फलमुक्तमत्र॥२९६॥ अल्पायुश्चरणास्थि

ते च गमनं देशांतरं जानुभे गुह्ये स्यात्परदारलंपट पटुर्नाभौ च संतुष्टये। ऐश्वर्यं हृदि चोरकर्मकरयोर्वीर्व्याप्तले स्कंधयोर्द्वे

व्यंवक्त्रगते च इष्टमशनं राज्यं शिरस्थोडुभिः॥२९७॥ कन्याजन्मनि डिंभचक्रं जपार्णवे। मस्तके त्रीणि ऋक्षाणि सप्त भानि

त्रीणि

मुखे न्यसेत्। स्तनद्वये १ ऋक्षाणि हृदये त्रीणि भानि च।२९८॥ नाभौ त्रीणि तथा गुह्ये त्रीणि

सूर्यर्क्षतो न्यसेत्॥ कन्याजन्मनि डिंभाख्यं चक्रमुक्तं स्वयंभुवा॥२९९॥ शीर्षसंता पयुक्ता

स्यान्मुखे धान्यधनान्विता॥ स्तनद्वये स्वामिप्रेमवृद्धिः कामस्तथा पुनः॥३००॥ हृदि सौख्य

युता गुह्ये नारी स्याद्व्यभिचारिणी॥ असंतुष्टा स्वामिरता नाभौ स्याज्जन्मकालके॥३०१॥ अथ

दशा। त्रि ३ चतु ४ लि २ चतु ४ श्रेवत्रि चतु ४ लि ३ चतुः क्रमात्। रच मतु शा गु फ क्र कृत्तिका

दिदशां लिखेत्॥३०२॥ आदित्ये षड्वर्षाणि ६ सोमे पंचदशानि च १५॥ भौमे चाष्ट वर्षाणि

८ बुधे सप्तदशानि च १७। १९२ शनौ च दश वर्षाणि १० गुरौ स एकोनविंशतिः १९ राहोर्द्वादश ए॰सः १६

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri ग्रहदशायां च बहु शो जायते स्मृतिः॥ शुभ

वर्षाणि २० शुक्रस्याप्येकविंशतिः २१॥२१॥ क्रूरग्रह

ग्रहदशांप्राप्यनराणांसुखमादिशेत्॥ ३०४॥ लग्नाच्चतुर्थगः पापो यदिस्याद्बलवत्तरः॥ तदामातृवधंकुर्यात्तत्केन्द्रेचापरोय
दि॥ ३०५॥ द्वादशेरिपुभावेवा यदा पापग्रहो भवेत्॥ तदामातृवधंकुर्याद्दरिराशौस्थिरोयदि॥ ३०६॥ इतिलघुसंग्रहेजा
तकप्रकरणं॥ अथप्रश्नविचारः॥ तत्रषट्पंचाशिकायाम्॥ वृषसिंहवृश्चिकघटेषुद्विस्थानंगमागमौनस्तः। नष्टंनचा
पिनष्टंनरोगशांतिर्नचाभिभवः॥ ३०७॥ तद्विपरीतंतुचरैर्द्विशरीरैर्मिश्रितंफलंवाच्यं। लग्नेंद्वोर्वक्तव्यंशुभदृष्ट्याशोभनम
तोऽन्यत्॥ ३०८॥ अथलाभप्रश्नः॥ त्रि३ पंच५ लाभ११स्त७मयेषु सौम्यालाभप्रदानेष्टफलाश्चपापाः। तुलायकन्यामि
थुनोपरश्चनराशयस्तेशुभंवदंति॥ ३०९॥ इन्दुर्द्विसप्तदशमायरिपुत्रिसंस्थः पश्येद्गुरुः शुभफलंप्रमदाकृतंस्यात्॥
लग्नार्थधर्मासुतनेधनगाश्चपापाः कार्यार्थनाशभयदाः शुभदाः शुभाश्च॥ ३१०॥ भट्टोत्पले॥ पापैर्लग्नोपगतैः शरीरपी
डांविनिर्दिशेत्कलहम्॥ सुखसंस्थैः सुखनाशंगृहभेदंबन्धुविग्रहंचवदेत्॥ ३११॥ अस्तगमनविरोधः कर्मस्थैश्चान्या
विसेनाशश्च॥ शुभदृष्टिसंयोगात्प्रश्नस्यकच्छाद्वदेत्सिद्धिम्॥ ३१२॥ दूरगतस्यागमनंसुतधनसहजास्थितैर्ग्रहैर्लग्ना
त॥ सौम्यैर्नष्टप्राप्तिर्लब्ध्वागमनंगुरुसिताभ्याम्॥ ३१३॥ द्वितीयेकेन्द्रतोऽभ्येतियदाखेटस्तदागमः॥ आपिपास्तर्ग्रहंदृ
ष्ट्वाब्रूयादितिप्रसंकितम्॥ ३१४॥ पञ्चमेशोथलग्नेशोविषमर्क्षगतोयदा॥ पुत्रजन्मप्रदौज्ञेयौकन्यानांसमराशिगौ॥ ३१५
॥सुताधिपोन्रराशिस्थः पुंराशिस्थोविलग्नपः॥ वीक्ष्यतः पुत्रदः प्रोक्तोयुग्मराशौचकन्यका॥ ३१६॥ लग्नाद्विषमोप
गतः शनैश्चरः पुत्रजन्मदोभवति॥ जीवार्कविलग्नचन्द्रमाद्विषमोपगतानरंकुर्युः॥ ३१६॥ गार्गीनाममुक्तादिति

CC-0 Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आ	इ	उ	ए	ओ
क	ख	ग	घ	च
छ	ज	झ	ट	ठ
ड	ढ	त	थ	द
ध	न	प	फ	ब
भ	म	य	र	ल
व	श	ष	स	ह
१।६।११	२।७।१२	३।८।१३	४।९।१४	५।१०।१५
नै॰ ७	प्रन ५	उत ५	अ ५	अ॰ ५
भा।अग्न	का।आ॰	चैत्र॰	ज्येष्ठ॰	माघ
वै	आ	पौ	का	फा

यिभिस्त्रिभिर्युता॥ रामैर्भागेसुताद्वाभ्यां स्कतश्चैकेनखेनवा॥ ३१७॥ हूतेनो क्ताहिवाणी खलुदशगुणिता राशिचक्रे विमिश्रा भूयो भूरेवदत्तानिकटजनयु तासप्तभागावशेषात् सके १ वन्हौ ३ शरैर्वा विषमपदयुतेनास्ति लाभोनराणां मूलेवेदे ४ रसेद्वाभवतिचनियतं कार्य्यसिद्धिस्तु राजन्॥ ३१८॥ इति श्री लघु संग्रहे लक्ष्मीनारायणाकृते प्रश्नसूचनप्रकरणम्॥ अथ किंचित्स्वरशास्त्रोक्त मुच्यते॥ कादिहं ताल्लिखेद्वर्णान्स्वराधोङञणोज्झितान्॥ तिर्य्यक्पंक्तिः क्र मेणैव पंचत्रिंशत्सु कोष्ठके॥ ३१९॥ नराणां मादितो वर्णो यस्मात्स्वरादधः स्थि तः॥ स स्वरस्तस्य वर्णस्य वर्णस्वर इहोच्यते॥ ३२०॥ नभस्ये मार्गवैशाखे अस्व रस्योदयो भवेत्॥ आश्विनः श्रावणाषाढौ षिकारो नायकः स्मृतः॥ ३२१॥ उका रश्चैत्रपौषस्या एकारो ज्येष्ठकार्तिके। ओकार उदयं याति माघफाल्गुनमासयोः ॥ ३२२॥ किंचित्लाभकरो बालः कुमारस्त्वर्द्धलाभदः॥ सर्वसिद्धिं युवादत्ते वृद्धे हानिर्मृते मृतिः॥ ३२३॥ इति पंचस्वरचक्रम्॥ चं द्रकालानलं चक्रं व्योमाकारं लिखेद्बुधः॥ चतुर्दिक्षु त्रिशूलानि मध्ये भिन्नानि कारयेत्॥ ३२४॥ मध्ये त्रिशूलपूर्वस्यां दिन क्षं सादि लिख्यते॥ त्रिशूले च बहिर्मध्ये बहिस्त्रिशूलकेतथा॥ ३२५॥ नामर्क्षं संस्थितं यत्र ज्ञेयं तत्र शुभाशुभम्॥ त्रिशूले

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri



ऋक्षवाह्ये च चक्रमध्ये तथैव च ॥ ३२६ ॥ त्रिशूले च भवे
न्मृत्युर्मध्यमं वह्निराष्टकं ॥ लाभः क्षेमो जयः प्रज्ञा च
न्त्वगर्भे न संशयः ॥ ३२७ ॥ वर्ज्जनीयं प्रयत्नेन प्रथमा
ष्टत्रिपंचकम् ॥ ऋक्षसंहा विंशकं चान्त्रकालरूपं न संश
यः ॥ ३२८ ॥ लाभालाभं सुखं दुःखं जयं चैव प्रजायते
॥ चंद्रकालानलं चक्रं ज्ञानसंशयवर्जितम् ॥ ३२९ ॥ रो
गे च कुजनक्षत्राद्दिनऋक्षान्त्वयुद्धके ॥ जयतो रुति
कर्क्षाद्धि सूर्य्यर्क्षाद्गन्यतो बुधैः ॥ ३३० ॥ इति चंद्रकाला
नलचक्रम् । ऊर्ध्वगास्त्रित्रिशूलाग्रास्तिस्रः तिर्य्यक्कृत



अथ चंद्रकालानलचक्रम् ॥

अथ सूर्य्यकालानचक्रम् ॥

संस्थिताः ॥ द्वे द्वे नाड्यौ स्थिते कोणे शृंगयुग्मं तथैव च ॥ ३३१ ॥ मध्यत्रिशूलरूपस्याधो भानुभाद्यमममण्डलम् ॥ सव्यमार्गेण दात
व्यं अष्टाविंशति संख्यया ॥ ३३२ ॥ नामऋक्षसंस्थितं यत्र ज्ञेयं तत्र शुभाशुभम् ॥ अधोगते स्थिनक्षत्रे रुद्धे गोवंधबंधनम् ॥ ३३३
॥ ऋक्षाष्टके जयो लाभो ऋक्षषट्के तथा पुनः ॥ शृङ्गयुग्मे रुजा भंगो मस्तुः शूलत्रये स्फुटं ॥ ३३४ ॥ यात्रायुद्धविवाहेषु रोगार्ते
व्यसने तथा ॥ सूर्य्यकालानलं चक्रं ज्ञातव्यन्तु प्रयत्नतः ॥ ३३५ ॥ इति सूर्य्यकालानलचक्रम् ॥ आर्द्रादिकं लिखेच्चक्रं मृगान्तं

T

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आ	पु	पू
पु	म	श्ले
उ	ह	चि
अनु	वि	स्वा
ज्ये	मू	पू
ध	श्र	उ
श	पू	उ
भ	अ	रे
कृ	रो	म

चन्द्रिनाडिकं॥ भुजंगसदृशाकारं मध्ये मूलप्रतिष्ठितं॥ ३३६॥ रवीन्दुनामनक्षत्रमेक नाड्यां यदा भवेत्॥ तदा मृत्युर्न संदेहो रोगाद्वा परिणो यवा॥ ३३७॥ इति त्रिनाडीचक्रम्॥ मुखे हस्ते पादौ चरणयुगले वक्षसि करे शिरो भागे नेत्रे नखचगुदके नामराशिभात्॥ लिखेदेकं १ वेद ४ रस ६ शर ५ चतु ४ स्त्रि ३ द्वि २ युग २ लं रणे हानिः पूजा भ्रमधनभयं भूसुखे मृतिः॥ ३३८॥ जन्माष्टकं द्वादशात् प्यगोपि हृदिशीर्षसव्येतरवाहुनेत्रे॥ तदा सुखं विघ्नकरं त्रिषष्ठो लाभेषु वक्त्रांघ्रिभुजे गुदस्थे॥ ३३९॥ इति शनिचक्रम्॥ अथ कोटचक्रम्॥ क्रूरागर्भे पुरं घ्नन्ति प्राकारे खंडिकारकाः॥ बहिस्था वेष्टके सैन्ये भंगदा नात्र संशयः॥ ३४०॥ क्रूरा गर्भे शुभा बाह्ये निश्चितं गृह्यते पुरम्॥ सौम्या मध्ये बहिः क्रूरा असाध्यं दुर्गमुच्यते॥ ३४१॥ अथ कोटपालकविधिः॥ शुक्रः सौम्यो गुरुर्मन्दराहवी

मुखे	१	हानि
हस्तेः	४	पूजा
चरणयोः	६	भ्रमनः
हृदयेः	५	धनम्
करयोः	४	भयम्
शीर्षे	३	भूपाल
नेत्रे	२	सुखम्
गुदे	२	मृत्युः

इति शनिचक्रम्॥

भानुजः शितः॥ बुधेन्दुभास्करे सौरिः सौम्येति माधवा मताः॥ ३४२॥ रविर्भौमः शितः सौम्यो गुरुः सौरिः शशिस्तमः॥ वर्गेशा अष्ट वर्गादौ कोटपालाः प्रकीर्तिताः॥ कोटाधिपः कोटमध्ये कोटपालो बहिः स्थितः॥ तदा कोटभयं नास्ति विपरीतास्तु हानिदाः॥ ३४३॥ बाह्यशत्रुप्रवेशार्थे संग्रामं यदि कारयेत्॥ तदा सिध्यति तं दुर्गं नान्यथा रुद्रभाषितम्॥ ३४४॥ पुरे भेनिर्गमे वक्रीकथं विक्रूरखेचराः॥ दुर्गमुक्तात दाकाले दुर्गस्थो न पलायते॥ ३४५॥ क्रूरे च स्तंभसंस्थेषु वक्रितेषु पलायते॥ रामः १८

T CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri



विज्ञाय दुर्गं दुर्गेशाः सन्देहो नात्र कारयेत् ॥ ३४६ ॥ दुर्गनाम्नः स्वरो यस्य वा लोवास्तमितो
पिवा ॥ तद्दिने प्रारभेद्युद्धं दुर्गं सिध्यति नान्यथा ॥ ३४७ ॥ पुरं नक्षत्रादीशानकोणतो लि
खेत् । गणनापि कार्या ॥ इति कोटचक्रम् ॥ लिखेत्पूर्वतो वामतश्चैत्र मुख्याश्चतुर्दिक्षु स
व्येनयामानथाष्टौ । दिगष्टभमन्मासततः सव्यतश्चाष्टधा ऽ थद क्षेत्र भोऽक्षेत्रपालौ ॥ ३४८ ॥
इति क्षेत्रपालभूमिः । दैवज्ञचिन्तामणौ ॥ इन्द्रप्राणयमेशापाशिहुतभुक्सोम्यासुरे ।
शुक्रमात् ॥ यामार्द्धे दिवसे प्रयाति जयतो रक्षेयपृष्ठे तमः ॥ ३४९ ॥ रात्रौ पश्चिमवह्नि
सौम्यनिर्ऋतिः प्राग्वात यामेशके घीशानाघटिकाद्वयं पुनरसौ तुर्ये चतुर्थे दिशि ॥ ३५०
इत्यर्द्धयामाः ॥ प्राचीकुबेरशिखिराक्षसधर्मराजलो याधिपानिलमहेशदिशि क्रमेण
यामार्द्धकैः प्रतिपदादितिथौ महेशी रक्षास्थिता शुभकरी खलु पृष्ठभागे ॥ ३५१ ॥ इति श्री
लघुसंग्रहे लक्ष्मीनारायणकृते चक्रप्रकरणं समाप्तम् ॥ चतुराशिचतुःकोणं नराकारं लि
खेद्बुधः ॥ रविभाज्जन्मभं लेख्यमीशानादौ च सव्यतः ॥ ३५२ ॥ शत्रुशीर्षे पलायंते शत्रुः
कर्णयोर्जोग्रतः ॥ दक्षिणे हस्ते च पादे च शत्रुशत्रोपसर्पतिं वामपादे च हस्ते च निश्चितं धार्यते रिपुः ॥ ३५३ ॥ दुर्गेन स्त्र
मारभ्य सूर्यो भवति पंचमः ॥ अथ वाहादृशो न क्षेत्र धाप्येकोनविंशतिः ॥ ३५४ ॥ षड्विंशे वाग्यनक्षत्रे प्रभंगो विनिर्दि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ई ३०। ८	पू १।९	अ ३।११
उ १०।२		द १३। ६
वा १५।७	प ६।१४	नै ४।१३

ई २५	पू १ २	अ० २६
उ ७ २	दिवाअ धयाम राहु०	द ३ २
वा २ १	प ५ २	नै २

धनहारविवेधःस्यात्
भौमकेतयोः॥३५५॥पुरहा
शनि वेधःस्यात्राहुश्चंद्रस्त
थास्त्रिया॥सप्तद्वशगःपुर
स्थाद्यदितिभास्करः॥३५६॥
पुरस्यपुरनाथस्य नवमेभा
स्करेपिच५।१२।१७।१९धन
हा१९बलहा१२पुरहा१९पुर
स्यहा२६स्त्रिहा२६धनहा
बलहाचैवपुरहापुरपहास्त्रिहा। अश्विन्याद्यंलिखेच्चक्रं सप्तविंशति तारकं॥त्रिकोणंनवभिर्वेधः कर्तव्यातिर्य्यगाकृतिः।
अश्विनीरेवतीवेधोवेधश्चाश्विनिज्येष्ठयोः मघापौषमघाश्लेषश्लेषामूलयोस्तथा। एवंसंघट्टचक्रेणकार्याक्रूरसगताग्र
हाः॥भूपनामर्क्षसंघट्टेयुद्धंभवतिनान्यथा॥३५७॥निर्वेधसौम्यवेधेचयुद्धंनास्तिनरेंद्रयोः क्रूरवेधेभवेद्युद्धंतत्कालेघो
ररूपिणं॥३५८॥युद्धकांभवेद्राजापुष्पभंक्रूरवेधितं।युद्धहेषीभवेत्सौम्यंतथावेधविवर्जितं॥३५९॥सौम्यक्रूरविभा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri







श्रीपताकीचक्रम्



गेनमित्रामित्रक्रमेणच।
वक्रातिचारगत्साच पुष्कं
स्वल्पं चनास्ति च॥ १६०॥
इतिसंघट्टचक्रं। प्रथमे
नात्यंचनगां कसूर्यं वे
न्दुषड्विंशमितानिभानि॥ शे
तेमहीनैवग्रहंविधेयं
गवापीखननंप्रशस्तं॥ १६१

अंधकंतरत्नुमंदलोचनंमध्यलोचनमतः सुलोचनं रोहिणीप्रभृतिभंचतुर्विधंनूनमत्रगणयेत्पुनः पुनः॥ १६२॥ लाभोधकेनिकट
एवहृतस्यचौरैर्द्रव्यस्यलब्धिरिहमेकरभेमलात्। हरेस्मृतिस्त्रिपोटिभेनचतद्दनाप्नोतिना॥ १६३॥ इतिश्रीलक्ष्मीनारायणकृतेलघुसंग्रहः
समाप्तः॥ ॥ वाराणसीप्रसादस्यनियोगेनप्रयत्नतः॥ काशिसंस्कृतमुद्रायामंकितोयंशिलाक्षरैः॥ १॥ श्रीकाशीजीमे मलदे
हौरकटोरा श्रीबाबूवाराणसीप्रसादजीकेमकानमेकाशीसंस्कृतमुद्रायंत्रमेछपी जिनकोलेनाहोयउनकोउक्तस्थानमेंश्री
पुतबाबूवाराणसीप्रसादजीकेपासयाकचौरीगलीमेभाईप्रसादसिंहजीकेदुकानपर मिलेगी संवत् १९४१ ॥ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इति लघुसंग्रहः समाप्तः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri